
ज्येष्ठमासः
वर्षम् –६८
अष्टमोऽङ्कः
विक्रमाब्दः २०७४
युगाब्दः ५११९
५ जून २०१७

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–




**हिन्दुसंस्कृतिरक्षायै सिक्खधर्मप्रसारकः।**
**हरगोविन्द एषोऽत्र षष्ठोऽधीशः प्रणम्यते॥**

## विषय-सूची



| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | सूक्ति-सुधा | डॉ. प्रेमचन्द्र रांवका | ५ |
| ५ | जागरूका मतदातार एव लोकतन्त्रस्य रक्षकाः | पं. प्यारेमोहनशर्मा | ६ |
| ६ | रोगनिदाने ग्रहाणां प्रभावः | डॉ. कृष्णगोपाल 'ब्रजेश' | ८ |
| ७ | मुरारिबापुसूत्राणि | डॉ. हर्षदेवमाधवः | ११ |
| ८ | गोमाता सदैव पूजनीया | डॉ. राकेश शास्त्री | १२ |
| ९ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १३ |
| १० | श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १५ |
| ११ | प्रेरकप्रसङ्गशतकम् | श्रीमती आराधना धर्माधिकारी | १६ |
| १२ | संस्कृतसमाचारः | डॉ. रघुवीरप्रसाद शर्मा | १६ |
| १३ | मातृदिवसः | ऋषिराजजानी | १७ |
| १४ | श्वेताश्वतरोपनिषदि योगः | डॉ. उषाकिरण यादवः | २० |
| १५ | शब्दार्थसम्बन्धः | ममता गुप्ता | २२ |
| १६ | ऋतुविहारे ऋतुवर्णनम् | आचार्य दीपक शर्मा | २४ |
| १७ | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | २८ |
| १८ | दत्तन्न राष्ट्राय किम् | डॉ. रामनारायण झा | ३० |
| ३० | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३१ |



### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु- **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी-15, न्यू कॉलोनी, जयपुर-302001**

**दूरभाषः 0141-2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें- प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**

जगद्गुरवो निम्बार्कपीठाचार्याः स्व. श्रीराधासर्वेश्वरशरणदेवाचार्याः

**प्रमुखसंरक्षकाः**

जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः



**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामाशर्मा

सहसम्पादकौ
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974


## मङ्गलाचरणम्

भाले यस्य विराजते शशिकला मौलौ च भागीरथी,
हारो यस्य भयङ्करो विषधरः पाणौ त्रिशूलस्तथा।
उत्सङ्गे च हिमाचलस्य तनया प्राणप्रिया पार्वती,
व्याघ्रस्याजिनधारिणं पशुपतिं वन्दामहे शङ्करम्।।

## मासावतरणम्

शुक्रे सा दिवसेश्वरस्य किरणैस्तप्तांशुमालिप्रिया,
छायाप्याश्रयते चिराय सुखदां छायां तरूणां शुभाम्।
गाहन्ते पशवो निपानसलिलं घर्मेण सम्पीडिताः,
एकत्राधिवसन्ति सिंहहरिणाः द्वेषं विहायात्मनः।।


कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

ज्येष्ठमासः
वर्षम् 68
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2074
जून, 2017
अङ्कः - 8
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

सम्पादकीयम्

# भारतं हिन्दुराष्ट्रम्

...✍ पं. प्यारेमोहनशर्मा

माता भूमिः पुत्रोऽहं पृथिव्याः सहस्रशो वर्षेभ्यः मन्त्रद्रष्टारो ऋषयोऽजूघुषन्। संप्रति उत्तरप्रदेशे भाजपा-दलेन प्रचण्डं बहुमतं प्राप्तम्। तदनन्तरमेव भारतं हिन्दुराष्ट्रमिति लोके चर्चा समारब्धा। वर्षत्रयेभ्यः पूर्वमपि नैकानि दलान्यवदन्-धर्मनिरपेक्षितावादिनः वामपन्थिनः उदारतावादिनः सर्वेऽकथयन् यद् भारतं हिन्दुराष्ट्रमिति प्रयत्ना विधीयन्ते केनचिद्दलेन। सम्प्रति नैकानि दलानि स्वीयां सम्भावनां प्रकटयन्ति कथयन्ति च यदि भारतं हिन्दुराष्ट्रं भवति तर्हि मुसलमानानां किं भविष्यति? नैकानि पत्राणि विशाललेखैः संसूचयन्ति यदधुना भारते मुसलमाना सुरक्षिताः न सन्ति। दूरदर्शनेषु अस्मिन्नेव विषये वादविवादाः प्रचलन्ति। अपरतश्च केचन हिन्दुत्व-समर्थकाः घोषणां कुर्वन्ति यदधुना भारतं हिन्दुराष्ट्रं भविष्यति।

परन्तु सर्वमिदमज्ञानिनां प्रलापो विद्यते। एते न हिन्दुं जानन्ति न राष्ट्रं जानन्ति न च राज्यमेव जानन्ति। शयितो जनो जागरितुं शक्यते परन्तु यो जागर्ति तं जागरितुं न कोऽपि समर्थः। उत्तमश्रेणिगता महानुभावास्तु जागृता एव अथवा शयननाटकं कुर्वन्ति अथवा कुम्भकर्णिनिद्रां गताः वर्तन्ते। अतः सम्यगवच्छन्तु राष्ट्रं नास्ति मृदा निर्मितं क्रीडनकम्। शतशो वर्षाणि कस्मिन्नपि भूखण्डे तत्रत्य निवासिनो यदा तं भूखण्डम्-अत्यन्तश्रद्धया मातृ-भूमित्वेन स्वीकुर्वन्ति तदा तस्मिन् राष्ट्रभाव उदेति। ततश्च तत्रत्यसमाजस्य काचित् संस्कृतिः विकसिता भवति तदा तत्र वासिनां कृते स भूखण्डः राष्ट्ररूपं गृह्णाति। तत्रत्यः समाज एव राष्ट्रं भवति। राष्ट्रीयसमाजस्यैका जीवनपद्धतिर्भवति समानाः परम्पराः महत्वाकाङ्क्षाः समाने सुखदुःखे समानाः स्मृतयः तथा शत्रुमित्रभावोऽपि समान एव भवति।

अतः एतादृग्दीर्घप्रक्रियानन्तरम् उक्तगुणैः युक्तः समाजः राष्ट्रं जायते। अतः भारतमेकं राष्ट्रं विद्यते। सहस्रशो वर्षेभ्यो भारतं हिन्दुराष्ट्रं विद्यते। यदा अरबदेशीया आक्रान्तारो भारतस्यैकस्मिन् भूभागे स्वकीयमाधिपत्यं स्थापयामासुः, तदापीदं हिन्दुराष्ट्र-मासीत् यदा अत्र आंगलाः शासनारूढाः आसन् तदापि भारतं हिन्दुराष्ट्रमविद्यत तथाद्यापि भारतं हिन्दुराष्ट्रमस्ति। भविष्यत्यपि हिन्दुराष्ट्रमेव भविष्यति।

### सनातनधर्म एव सर्वश्रेष्ठो धर्मः

जापानीय मारियावर्थ नामा महिला लिखति यत् हिन्दुत्वं सनातनधर्म एव अन्येभ्य ईसाईमुस्लिम-सम्प्रदायेभ्यः सर्वथा पृथक् वर्तते। विश्वोपकरणे सक्षमः सनातनधर्मः। सा लिखति यदा पञ्चदशवर्षवयस्का आसम् तदा एकस्मिन् सर्वशक्तिसम्पन्ने ईश्वरेऽविश्वसम्। तस्या मनश्चर्चे प्रतिरविवासरं प्रार्थनां कर्तुं न समुचित-ममन्यत। ईसाईधर्मोऽस्मान् बोधयति स्म यत् चर्चे प्रार्थनायां यो न गच्छति स अन्ते नरके अग्निना दग्धो भविष्यति। परन्तु मम मनसा अयं भयः किञ्चित् कालानन्तरं सर्वथा व्यपगतः। शनैः शनैः पुस्तकानाम-ध्ययनेन ईसाईधर्मे मदीयो विश्वासः सर्वथा अलुम्पत्। गैलोलियोसदृशाः वैज्ञानिकाः ''पृथ्वी सूर्यं परितो भ्रमति'' इतिसिद्धान्तमजूघुषन् तदा चर्चाधिकारिणस्तं कठोर-दण्डेन अदण्डयन् तदा सर्वेऽपि वैज्ञानिका मौनिनोऽभवन्। परन्तु सौभाग्येन बाल्तेयरसदृशा वैज्ञानिकाः कठिनं संघर्षमकुर्वन् ततश्च तीव्रगत्या वैज्ञानिको विकासः संजातः। रिलीजनशब्दस्य नास्ति कोऽपि सुनिश्चितोऽर्थः। ईसाईइस्लामश्च उभावेव बाई-बिलकुरानोल्लिखितं सिद्धान्तमेव सत्यमित्यङ्गीकुरुतः। यश्च बाईबिलसिद्धान्ते कुरानसिद्धान्ते वा न चलति स नरकं गच्छति।

अधुना प्रश्नः समुदेति ''हिन्दुत्वं किं विद्यते'' वस्तुतो हिन्दुत्वं न रिलीजनम्। ये हिन्दुत्वं स्वीकुर्वन्ति न हि ते केनापि मार्गेण प्रतिबद्धा विद्यन्ते। अत्र विचाराणां

स्वातन्त्र्यं विद्यते। प्रश्नानां स्वातन्त्र्यम्। कोऽपि कस्मिन्नपि विषये प्रश्नं कर्तुं शक्नोति। हिन्दूइज्म बुद्धिज्म जैनिज्म इत्येवं संकीर्णसिद्धान्ता इज्म नाम्ना सम्बोधिता जायन्ते। भारते सहस्रशो वर्षेभ्यो नाना परम्परा: प्रचलन्ति सर्वत्र सामञ्जस्यं वर्तते। परस्परं संवादा अपि जायन्ते। परन्तु ईसाईजना: इस्लामाश्च प्रारम्भत एव युध्यन्ति। अतो भारतीयचिन्तनं सर्वोत्कृष्टं विद्यते।

भारतीयचिन्तनं कथयति सत्यस्यान्वेषणं कुर्वन्तु चर्चां कुर्वन्तु प्राचीनानां ज्ञानमवगन्तुं प्रयत्नं कुर्वन्तु। हिन्दुत्वं प्रत्येकं जनम् ''आत्मज्ञानाय प्रेरयति। हिन्दुत्वं सनातनो धर्म: नान्यं हठात् स्वसिद्धान्तान् स्वीकर्तुं कथयति।''

**भारतं विज्ञाननिधि: आसीत्-**

परन्तु आश्चर्यजनकमिदं यदाधुनिकवैज्ञानिका अपि भारतस्यानुपमयोगदानस्योपेक्षां कुर्वन्ति। ते यूनानयोगदानमेव स्वीकुर्वन्ति। परन्तु विश्वस्य प्राचीनतमे ग्रन्थे ऋग्वेदे दशममण्डले द्वाविंशतितमे अध्याये चतुर्दशतमऋचायां ''पृथ्वी सूर्यं परिक्रामती'' त्युल्लेखो वर्तते। परन्तु पक्षपातिनोऽधुनापि 400 वर्षपूर्वं जातं कापरनिक्समेवोक्तसिद्धान्तस्य श्रेय: प्रयच्छन्ति।

परन्तु भारते पञ्चमशताब्द्याम् ''आर्यभट:'' समुत्पन्न:। असौ महान् गणितज्ञ: खगोलशास्त्री चावर्तत। परन्तु प्राचीनभारतीयानां ज्ञानोपलब्धिश्रेयोऽधुनापि अरबीया यूरोपीयाश्च स्वस्मिन्नेव साधयन्ति।''इन्फिनिटी फाउण्डेशन'' अधुना विंशतिखण्डेषु प्राचीनभारतीय वैज्ञानिकानां परिचयात्मकं ग्रन्थं प्रकाशयति। रूढिवादिनो नहि कदापि विज्ञानविकासमसहन्त। भारते सनातनधर्मो न विज्ञानविकासे बाधकोऽजायत। अस्य कारणमिदं वर्तते सनातनधर्मो हिन्दुत्वं वा विज्ञानाधारितो वर्तते। वस्तुतस्तु सनातनधर्म: स्वस्मिन् विज्ञानमेवास्ति।

---

# सूक्ति-सुधा

❑ **डॉ. प्रेमचन्द्र रांवका,** पूर्व आचार्य:

**मन:शुद्ध्यैव शुद्धि: स्याद्देहिनां नात्र संशय:।**
**वृथा तद् व्यतिरेकेण कायस्यैव कदर्थनम्।।**

- ज्ञानसार:

मन की शुद्धि से ही प्राणियों की शुद्धि होती है। इसमे संदेह नहीं है। यदि मन शुद्ध नहीं हुआ तो तप आदि कायकष्ट ही हैं। न वारिणा शुद्ध्यति चान्तरात्मा- अन्तरात्मा जल से शुद्ध नहीं होती।

**स्वात्मवत् सर्वभूतेषु कायेन मनसा गिरा।**
**अनुज्ञा या दया सैव प्रोक्ता वेदान्तवेदिभि:।**

-जाबालयोग:

शरीर, मन और वाणी से अपने ही समान सब प्राणियों के प्रति जो अनुभूति होती है, उसे ही अध्यात्म तत्व के ज्ञाता दया कहते हैं।

**मातृवत्परदारेषु परद्रव्येषु लोष्ठवत्।**
**आत्मवत् सर्वभूतेषु य: पश्यति स पण्डित:।।**

-हितोपदेश:

परनारियों को माता समान पर-पदार्थों को मिट्टी के समान और सब जीवों को अपने समान देखने वाला ही पण्डित है।

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**
**आत्मन: प्रतिकूलानि परेषां न समाचरेत्।।**

-वेदव्यास:

धर्म का सार सुने और सुनकर धारण करें। धर्म का सार यही है कि अपनी आत्मा के प्रतिकूल व्यवहार दूसरों के साथ नहीं करना चाहिये।

महाराज-संस्कृत-महाविद्यालय:, जयपुरम्।

# जागरूका मतदातार एव लोकतन्त्रस्य रक्षकाः

❑ पं. प्यारेमोहनशर्मा

उत्तरप्रदेशस्य निर्वाचनमनेकेषु-अर्थेषु ऐतिहासिकः संजातम्। परन्तु अस्य सर्वाधिकः सशक्तः पक्षो वर्तते जागरूकमतदातॄणां व्यवहारः। मतदातुः व्यवहारस्य समीक्षायै स्थापितमानदण्डानुसारं वैचारिकी प्रतिबद्धता समस्याः प्रति संवेदना तात्कालिकाः पक्षाः वायोः प्रवाह-प्रभृतयः सुपरिचिताः सन्दर्भास्तु सन्ति एव। परन्तु अस्मिन् निर्वाचने मतदातारं तेऽपि न ज्ञातुमशक्नुवन् ये तान् स्वीयपक्षे सुदृढानमन्यन्त। मतदातुः शिखरगतं वेगं दृष्ट्वा सर्वेऽप्या-श्चर्यसागरे निमग्नाः। निर्वाचनपरिणामेषु स्वकीयां प्रथम-प्रतिक्रियायामाश्चर्यं प्रकटयन् अखिलेशयादवोऽपृच्छत् यदस्माकं निर्वाचनसभासु तु विशालो जनसम्मर्दः समुपस्थितोऽभवत् परन्तु मतदानदिने स कुत्र लुप्तोऽजायत? भाजपानेतारोऽपि न तादृक् बहुमतावाप्तये आशान्विता अविद्यन्त। तर्हि प्रश्नः समुदेति यत् मतदातॄणां व्यवहारनिर्धारणाय के नवीनाः मानदण्डाः समुपस्थिता अभूवन् यान् राजनैतिकविश्लेषका अपि न ज्ञातुमश-क्नुवन्। यद्यपि निर्वाचनवातावरणे चिरकालपूर्वमेव एतानि लक्षणान्यलक्ष्यन्त।

प्रथमः सशक्तः प्रभावः व्यवहारस्य संवादस्य आत्मविश्वासस्य च यः मतदातुः मनसि विश्वासोत्पादने सफलोऽभवत् यान् यो जनः मञ्चात् वदति स तेषां हितैषी वर्तते। कस्यापि वक्तुः वाक्पटुता भाषणशैली प्रत्युत्पन्नमतित्वं तदैव कार्यं साधयति यदा भवतामाचरणं विश्वसनीयं भजेत् कुटिलता च मनसि न भवेत्। वस्तुतस्तु भारतीयमतदातारः इतः पूर्वं नैकशः भावनात्मकपक्षप्रवाहे प्रावहन्, परन्तु वर्तमानभावनात्मकप्रवाहः केनापि धार्मिकपक्षेण ग्रथित आसीत् न च विशिष्टं प्रति संवेदनात्मकप्रवाहे निमज्जित आसीत्। मतदानात् पूर्वं ये पक्षाः मतदातारं प्रभावयन्ति तेषां परिदृश्यं पूर्वरूपेण परिवर्तितमभवत्। राजनैतिकसिद्धान्तानुसारं पूर्वं चिरं यावत् राजनैतिकदलानां विचारधारापद्धतिः मूल्यानि स्वतन्त्रतान्दोलने योगदानाद्याधारेण प्रतिबद्धा मतदातार-स्तादृशमेव दलं श्रेष्ठममन्यन्त। परन्तु तदानीं चत्वारिंशत् पञ्चाशत् वा प्रतिशतमेव मतदानं जायते स्म। परन्तु अधुना न तत् सर्वं कोऽपि समीक्षते। मतदाता सप्रमाणं दलानां कथनं स्वीकरोति दलानां साफल्यं स्वयं समीक्ष्यैव तेषु विश्वसिति।

उत्तरप्रदेशे राजनैतिकदलानां सभासु विशालो जन-सम्मर्दः सर्वेभ्यो भ्रमोत्पादने सक्षमोऽविद्यत। अतः दलानि पूर्णरूपेण भ्रमितानि विशालो जनसम्मर्दः अस्माकं पक्षे वर्तते इत्यमन्यन्त। सत्यता त्वतः सर्वथा विपरीता एव। यथा कस्मिंश्चिन्नगरे आपणेभ्यो बहिर्गच्छन् जनसमुदायाः ग्राहकाः न भवन्ति। तथैव सर्वोऽपि जनसम्मर्दः न भवति समर्थकः।

सभासूत्सवेषु नैकप्रकारका जनाः समायान्ति। सर्वेषां मानसिकता भिन्ना भवति केचनोत्सवदर्शकाः, केचन मनोरञ्जनाय। परन्तु अधिकांशमतदातारो विवेकनिकषोपरि नेतृगणं परीक्षितुमायान्ति। अतः वर्तमानराजनैतिक-सिद्धान्तो वर्तते लोकः स्वेच्छया भवन्तमतिवादिनं कथयन्तु नाम परन्तु यदि भवन्तः प्रखराः राष्ट्रवादिनो विद्यन्ते तर्हि भवद्भ्य एव समर्थनं मेलिष्यति। अन्ताराष्ट्रिया नैका घटनाः निर्वाचनपरिणामा ट्रम्पस्योन्नतिसदृशमेव कार्यमुत्तर-प्रदेशेऽप्यभवत्।

नरेन्द्रमोदीमहोदयानां तीक्ष्णव्यङ्ग्यात्मिका, समाकर्षका स्पष्टवादिता सुदृढा वाणी धाराप्रवाहरूपेण भाषणं विकासावलिवर्णनं च उत्तरप्रदेशे भाजपापक्षं निरधारयत्। इतिहासः साक्षी वर्तते विश्वस्मिन् विश्वे सहस्रशो नेतारः श्रोतॄणां स्तरानुकूलां मनोनुकूलां भाषामवलम्ब्य वदन्ति संवादं कुर्वन्ति सम्बन्धान् स्थापयन्ति ते सफलतायाः समर्थनस्य च सोपानेषु निर्बाधं धावन्त आरोहन्ति। उत्तरप्रदेशे नैके नेतारस्तथा प्रायतन्त किन्तु सफलता तु मोदीमहोदयेनैवाधिगता। यतोहि मोदीमहोदयाः पूर्ववर्ति-नेतॄणां वक्तव्यानि सम्यगधीत्य समागच्छन्। विरोधिनां

व्यङ्ग्यबाणानपि-अभिधायामेव कथयित्वा प्रतिष्ठामलभन्त। गुर्जरप्रान्तस्य गर्दभेषु अखिलेशयादवस्य व्यङ्ग्यं मोदी यथावदगृह्णात्। गर्दभस्य परिश्रमं दैन्यं स्वामिभक्तिमतिकौशलेन यथा मोदी मतदातारमवाबोधयत् तत् तस्य कौशलं सफलतामलभत।

एतेन सिद्ध्यति यत् मतदातारः सकारात्मकं सार्थकं च कथनमवगच्छन्ति गृह्णन्ति च नाटकं तु बलात्कारिणा गायत्री-प्रजापतिनापि बहु कृतम्। सभायामरुददपि परिणामः शून्य एवासीत्। एतेन सिद्ध्यति यत् मतदातारः पाखण्डं नाटकं कपटाचरणं सम्यगवगच्छन्ति। एषैव मतदातुः साक्षरता जागरूकता च।

अनेन निर्वाचनेन सिद्धान्तोऽयं सम्मुखे समागतः यत् जनप्रतिनिधयः स्थायिनो विजयशीलास्तु भवेयुः परं विक्रयशीला न भवेयुः। सर्वकारस्य भ्रष्टाचरणं विधायकानां विक्रयशीलता पूर्णरूपेण अगुञ्जत्। जनता यदा हस्तयोः शस्त्रं गृह्णाति तदा निष्क्रियतायाः शैथिल्यस्य च पूर्णरूपेण मूल्यं प्रयच्छति बहुजनसमाजवादिदलस्य तु सदस्यता एव मूल्यैः (विक्रयैः) एव संजाता। सर्वे तथ्यमिदमजानन्। परन्तु सम्प्रति विकल्पानां बाहुल्यं विद्यते अतः तानि दिनानि व्यपगतानि।

उत्तरप्रदेशस्य निर्वाचनपरिणामो बोधयति यत् सम्प्रति जातिधर्मगोत्रभूगोलादयः सर्वे विलुप्ताः संजाताः। यदि कश्चन मतानां ध्रुवीकरणम् अथवा सवर्णानां केन्द्रीकरणं जातमिति वदेत् तर्हि स कथने स्वतन्त्रः वदेन्नाम। परन्तु अल्पमतक्षेत्रेष्वपि सच्चरित्राणां विजयः निश्चयेन सत्यं प्रकटयति। उच्चसाहसे अनुभवस्य वरीयतासिद्धान्तः सम्मुखे समागतः। युवानेतारः युवकानामुत्साहः युवकुलस्य नेतृत्वं त्रितयम् एव संशयेन ग्रस्तमासीत्। साम्यताया अभावे कार्यं न कथमपि श्रेष्ठं भवितुं शक्नोति स्म। दिल्लीस्थाः युवानेतारः उत्तरप्रदेशनिर्वाचनमादाय भ्रमिताः आसन्। सप्तविंशतिवर्षेभ्यः उत्तरप्रदेशस्य स्थितिः समीचीना न विद्यते इति उद्घोषकाः सहसैव तेषामुत्सङ्गे समुपाविशन्। शय्यासूपविश्य भवन्तो यं भ्रष्टसर्वकारमजूघुषन् सहसा तेनैव सह सहमताः समभूवन्। अन्यो नेता यो वृद्धानामपमाने दक्ष आसीत् जनता सम्यगवगच्छत् यः पितुरेव नाभवत् स अस्माकं किं भविष्यति?

अपरतश्च परिवारवादेन सर्वथा मुक्तः, परिपक्वोऽनुभवी, दूरद्रष्टा, अवसराणां पूर्णरूपेण दोग्धा युवकेभ्योऽधिकमुत्साही, स्फूर्तिमान् निरालसः, असौ प्रौढः प्रभावशाली स्वकथनं कथितुं समर्थः। युवमतदातॄणां सर्वाधिको विश्वासपात्रं सहस्रशो वर्षेभ्यो भारतीयाः स्वीकुर्वन्ति यत् किशोराणां मूल्यं सहस्रशः युवकानां लक्षरूप्यकाणि प्रौढानां च कोटिरूप्यकाणि भवन्ति। यदा च मतदातुः सम्मुखे अग्नितुण्डवत् शोभायमानः कश्चित् प्रौढस्स्यात् तर्हि तस्मिन्नेव सर्वे विश्वसन्ति स्वसाफल्यं च पश्यन्ति।

अन्यः पञ्चमः सिद्धान्तः श्रोतृगणः क्रियाशीलं मतदातारं परिचाययति। निर्वाचनसभासु समागतो जनसम्मर्दः गृहेषु गत्वा नोपविशेदिति परमावश्यकः। अतः यथा दैनिकजीवनस्यानुभवो बोधयति यद् भवतां सत्यनिष्ठः सुदृढः मित्रः स एव यः सर्वदा भवतां सहायतां कुर्यात्। इतः पूर्वं सहायकं मित्रं गृहात् समुचितसमये आवाहनं परमावश्यकम् उत्तरप्रदेशनिर्वाचनेषु एतदेव जातम्। भाजपादलं बूथपर्यन्तं समप्रेषयेदपि। अन्यमनस्कान् आलस्येन गृहोपविष्टान् कार्यव्यस्तानपि गृहात् निःसार्य बूथं प्रापयत् कार्यकर्ता। अत एव भवतः सम्मानेन प्रसन्नाः कमलाय मतदातारोऽपि भवद्भ्यः प्रचुरमात्रायां मतानि प्रायच्छन्।

इत्थमुत्तरप्रदेशनिर्वाचनविश्लेषणेन निम्नाङ्कितानि तथ्यानि सम्मुखे समायान्ति-

1. हिन्दुमतदातॄणां सुदृढं ध्रुवीकरणम्। 2. मतदातॄणां परिपक्वता। 3. राजनैतिकदलानामुत्तरदायित्वम्। 4. समर्थकानां विपुला अभिलाषा। 5. परीक्षकवत् सफलदलस्य परीक्षणम्। 6. शिक्षकवत् अभिभावकवत् भवन्तं (निर्वाचितदलम्) अनुत्तीर्णं द्रष्टुं नेच्छति।

अतः प्रधानमन्त्रिणा स्वकार्यकर्तृणां सहयोगेन बहुमतमवाप्तं तदनुरूपमेव सर्वाणि विकासकार्याणि सम्पत्स्यन्ते इति विश्वसिमः।

# रोगनिदाने ग्रहाणां प्रभावः

❑ डॉ. कृष्णगोपाल 'ब्रजेश'

सुविदितमेव विद्वज्जनानुमोदितस्य, सकल-जन-धर्मानुष्ठानादि-सामाजिक-क्रियाकलाप-पावन-पथ-परिचायकस्य, वेद-वेदाङ्ग-प्रमुखाङ्ग-चक्षुर्भूतस्य समस्त-क्रतु-भाग-यजन-विधान-निदर्शन-काल-दर्शनस्य, अखिलब्रह्माण्ड-मण्डल-मण्डन-मण्डलीक-मुख-तिलकस्य, रवि-शशि-प्रधानस्य खगोल-विद्या-विज्ञान-ज्ञान-गरिमा-मूलस्य, सच्चिदानन्द-घनपूर्ण-ब्रह्माणे नयनरूपतया प्रथित-ज्यौतिषशास्त्रस्यामन्दं महत्त्वम्।।

तदिदमानन्द-कन्द-सन्दोहभगवतो वेदपुरुषस्य कृपाकटाक्षतश्चतुर्दशविद्यासु प्रमुखास्पदं विन्दति। सनातनादिकालतः वेदाङ्गेषु च शेखरायते ननु। ''द्युति धातो द्युतिरिसिन्नादेश्च'' इत्यौणादिसूत्रे जकारस्यादेशाज् ज्योतिरिति शब्दस्य निष्पत्तिः। यत्र स्वप्रकाशितानां सूर्यादिग्रहाणामश्विन्यादिनक्षत्राणां समावेशोभवति, तान्यधिकृत्यलिखितं शास्त्रं ज्यौतिष-शास्त्रमिति नाम्ना प्रख्यायते, अन्यच्च ज्योतिषां सूर्यादिग्रहाणां वा ज्योतिः पदार्थानां व्यञ्जकत्वेन, खगोलस्थितानां ज्योतिर्मयानां ग्रह-नक्षत्र-पिण्डानां, संचार-भूपरिभ्रमण-ग्रहण-ग्रहास्तोदयप्रभृति-गति-विधि-स्थिति-समूहस्य, बोधकं शास्त्रमित्यपि ज्यौतिषशास्त्रम्।

यथा हि भगवतो वेदपुरुषस्य, स्वाङ्गेषूपकार्योप-कारकं भावविषयकं स्वरूपमभिवर्तते, तथैव ज्योतिष-शास्त्रस्यापि तद्रूपं दृश्यते, इदं हि ज्योतिष-शास्त्रं, सिद्धान्त-संहिता होरेति स्कन्धत्रयात्मकमिति, सिद्धान्त-शाखायामार्षग्रन्थस्य, सूर्य-सिद्धान्त-स्याप्रतिमं वैशिष्ट्यं खगोल-गणिते। तत्र क्रमान्नारद- लोमश-भृगु-कश्यप-रावण-लगध-वराह-मिहिरादिभिर्विरचित-संहितासु, वेदाङ्गज्योतिषे च विषयस्यास्य मनोग्राहि सर्वाङ्गीणं वर्णनमस्ति। सन्त्यस्य शास्त्रस्याचार्याः प्रवर्तकाश्च ''सूर्य-पितामह-व्यास-वशिष्ठ-पौलिस-रोमकार्य ब्रह्म-वराह-भास्कर-प्रमुखाः ज्योतिष-शास्त्र-समुपासकाः समुद्धारकाश्च-''

**''सूर्यः पितामहो व्यासो, वशिष्ठोऽत्रिः पराशरः।**
**काश्यपो नारदो गर्गो, मरीचिर्मनुरङ्गिराः।।**
**लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः।**
**शौनकोऽष्टादशश्चैते, ज्योतिःशास्त्र-प्रवर्तकाः।।''**

सूर्यप्रमुखाः पृथ्वीसहिताश्चन्द्रादि सर्वे ग्रहाः सौरमण्डलस्य सदस्याः सन्ति।

**तेजसां गोलकः सूर्यो ग्रहर्क्षाण्यम्बुगोलकाः।।**
**प्रभावन्तो हि दृश्यन्ते, सूर्यरश्मिप्रदीपिताः।।**

लोकानां प्रत्ययोभवस्थितिविभुर्भगवान् विव-स्वानखिल-विभूत्युत्पत्तिहेतुभूतोऽयमात्मा त्रिभुवनस्य, **''ब्रह्मोपेतस्तथा दक्षो, यज्ञोपेतश्च संस्मृतः एते देवा वसन्त्यर्के...।''**

नन्वयं जगतः प्रसवो विश्वात्मा सहज भूषणो नभसः।। कमनीयकनकसदृशदश-शत-मयूख-मालार्चितसविता, स्वकीयापरिमेय-शक्ति-संघात् सर्वेभ्यो लोकेभ्यो जीवन-शक्ति-दानं करोति निर्बाधरूपेण, तथैव सर्वे ग्रहाः जडचेतनेषु शुभाशुभानि

प्रयच्छन्ति। जागतिक-जीव-जातिषु ग्रहाणां प्रभावो विद्यते, ग्रहगतिपरिभ्रमण-वश-वशीभूतानां, भयज्वरस्थानां धूम्रकेतुग्रह-ग्रहण-युतिः व्यतिपात-भद्रादीनां, ग्रह-नक्षत्रादीनाञ्च, स्वतंत्रतया संयुक्तया च स्वकीयः प्रभावो व्यष्टि-समष्टिगतभूगोल-खगोल-स्थितेषु चराचरजगत्सु, जगति पदार्थमात्रेषु पतति नात्र सन्देहलेशोऽपि।

ग्रहाणां परस्परमाकर्षण-विकर्षण-क्रिया-प्रति-क्रिया-वृत्या, एतेषां सूर्यादिग्रहाणां शुभा-शुभत्व-गुण-धर्मादीनां प्रभावः पिण्डेषु प्रभवति "यथा ब्रह्माण्डे तथा पिण्डे" तदंशकाः ज्योतिमन्तो ग्रहाः देवाश्च। सौरजगति यान्यशुभ-शुभानि भवन्ति तानि सर्वाणि प्राणिनां मनो-बुद्धि-शरीर-विग्रहेषु प्रतिक्रियामुत्पादयन्ति। एवमने-कैरूहापोहैर्निष्कर्षमिदमाविर्भवति, यदंतरिक्ष-स्थित-सौरमण्डलकिरणतरङ्गैः सकलमपि चराचरं जगदनु-प्राणितं भवतीति पौर्वात्य-पाश्चात्य-विपश्चिद्भि-रनुमोदितम्।।

अपि च जगतः स्थावरजङ्गमात्मकस्य भावाभावौ, उत्पत्ति-निरोधौ ग्रहाधीनौ (मिताक्षरा) पराशरहोरायां वै श्रीमद्भगवतः दशावतारेषु सूर्यात्, चन्द्रात् कृष्णस्य, भौमात् नरसिंहस्य, बुधात् बुधस्य, बृहस्पतेर्वामनस्य, भार्गवात् परशुरामस्य, मन्वात् कूर्मस्य, राहोर्वराहस्य, केतोर्मत्स्यस्य च प्रादुर्भावः समजनि। इति स्वकीयैर्विशिष्टांशै "दैत्यानां बलनाशाय, देवानाञ्च बल-वृद्धये, विजयाय च ग्रहाणां प्रभावः। किमधिकं विज्ञेषु" ग्रहाधीनं जगच्छर्वं सूर्य-सोमात्मकं जगदिति।

**शरीररचनाव्यवस्थायां ग्रहाणां प्रभावः -**

**"कतल-धनाङ्कुरास्थि चर्माङ्गजचेतनता।**
**सिनकुज, जीवरवि, चन्द्रार्कि-बुधापरतः।।**
**उदयपश्चन्द्रसूर्यनाथाः क्रमशो गदिता।**
**भवन्ति, शुभाशुभं च, मासाधिपतेः सदृशम्।।"**

तथैव

**मेष, वृष, मि. कर्क. कन्या (कटि)**
**कालाङ्गानि वराङ्गमानन मुरो, हृत्क्रोड वासोभृतो**
**तुला, वृश्चि., धन., मन, कु., भीम.**
**बस्तिर्व्यञ्जनमूरूजानुयुगले जङ्घे ततोऽङ्घ्रिद्वयम्।।**

अन्यच्च-

**कालात्मा दिनकृन्मनस्तुहिनगुरुसत्वं कुजाज्ञो वचो,**
**जीवो ज्ञानसुखे, सितश्च मदनो दुःखं दिनेशात्मजः।।**
**"राजानौ रविशीतगू क्षितिसुतो नेता कुमारो बुधः,**
**सूरिर्दानवपूजितश्च, सचिवौ प्रेष्यस्सदृस्रांशजः।।"**
**दिवार्कशक्रौ पितृमातृसंज्ञितौ, शनैश्चरेन्दू निशि तद्विपर्यात्।।**

**कालनरस्यावयवान्, पुरुषाणां चिन्तयेत् प्रसवकाले।**
**सदसद्ग्रहसंयोगात्, प्रष्टान् सोपद्रवांश्चापि।। वराहः**

दिवा गर्भाधाने सूर्यः पितृसंज्ञकः शुक्रो मातृ-संज्ञकः रात्रौ गर्भाधाने च, शनिश्चरः पितृसंज्ञकः चन्द्रश्च मातृसंज्ञकः प्रथममासे कललं (रजोवीर्यमिश्रणम्) द्वितीयमासे, तस्मिन् कलले घनत्वमुत्पद्यते, तृतीयमासे अवयवानां प्रसूतिः, चतुर्थमासे अस्थिनिर्माणं, पञ्चममासे चर्म-निर्मितिः, षष्ठमासे अङ्गज-लोमरोमकूपादीनां, सप्तममासे, चैतन्यमुत्पद्यते।। अत्र क्रमशः मासेश्वराः भवन्ति। (१) शुक्रः (२) भौमः (३) गुरुः (४) सूर्यः (५) चन्द्रः (६) शनिः (७) बुधः (८) लग्नेश्वरो, उदययः (९) चन्द्रः (१०) सूर्यः- अत्रेदं वक्तव्यं भवति यत् प्राणिनां शरीरनिर्माणे, तनूत्पादन-कार्य-कारण-

भूत-माता-पितृणां, सम्प्रेरकत्वेनाऽपि ग्रहाणां कारकत्वं भवति, तथैव निर्माणकर्मणि-आधि-व्याधि-रोग-दोषादीनामपि ग्रहाणामेव कारकत्वं भवतीति कार्य-कारण-सम्बन्धाददतिरोहितं मतिमत्सु।

यस्य मासस्य मासेश्वरो निर्बलो वा प्रतिकूलः- स्वस्मिन् मासे, गर्भ-स्वरूपं विनाशयति। मासाधिपे पीवरे गर्भ-पुष्टिं करोति। गर्भस्य शुभाशुभज्ञानाय, सूर्यादि ग्रहचारं दृष्ट्वा, तद्रक्षणार्थं तस्य तस्य ग्रहस्य जप-दान-पुरस्सरं विष्णुबलि-पूजाविधानं शास्त्रेषूपलभ्यते। प्रयोग-पारिजाते वसिष्ठोऽप्याहः-

**''पीताम्बरं कृष्णवर्णं, शंख-चक्र-गदाम्बुजम्। वैकुण्ठ-वासिनं विष्णुं मृत्कुंभे स्थापयेत्ततः।। विष्णुस्वरूपं कनकेन कृत्वातल्लिगमंत्रेरथ गन्धधूपैः।'' वस्त्राक्षतैर्गुग्गुल-धूप-दीपनैवेद्यतांबूलफलैश्च सम्यक्।। कृत्वा च देवतापूजां गर्भाणां रक्षणाय च।। ब्राह्मणाय प्रदातव्या प्रतिमावस्त्रसंयुता इति। ग्रह-योगानुसारं गर्भ-रक्षणार्थं विष्णु-पूजा-बलि-विधानम्। तत्र अयणे-रोहिण्यां पुष्ये, चैव प्रशस्यते, द्वितीया सप्तमी, चैव द्वादशी शुभा तिथिः।। शुभग्रहोदयाः शस्तास्तेषां च दिवसाधिपाः।।**

यस्य मासस्य योऽधिपस्तस्मिन् वारे शान्तिः कर्त्तव्या जातकस्य प्रसूतिकाले, ज्येष्ठा-मूल-प्रभृति-गण्डान्त-नक्षत्रेषूत्पन्नस्य नेष्टं फलं भवति। अतः ज्योतिः शास्त्रानुसारं जन्मसमये विचिन्त्य, जन्मकालिकबालारिष्टं विज्ञाय शुभाशुभकारण-भूतानां ग्रहाणां, शान्ति-विधानं निरुक्तमाचार्यैः उक्तशान्त्यकरणे महान्प्रत्यवायः-

**यदाह नारदः-**

मूलाश्लेषादि दोषसंभवे शान्तिर्न क्रियते, तदानिष्टं भवत्येव विभिन्न-पक्षेषु-

**वत्सरात्पितरं हंति, मातरं तुन्निवर्षतः। धूम्रं वर्ष- द्वयैनैव श्वसुरं नववर्षतः।। जातं बाणं वत्सरेणावर्षैः पञ्चभिरग्रजम्।। श्यालकं चाष्टभिर्वर्षैरनुक्तान् हंति सप्तभिः।।** तथैव प्रतिपदि चन्द्रदर्शनेन, शुभाशुभत्वं वर्णितम्।। गर्ग-संहितायां-यदा चन्द्रप्रतिपदि नौसंस्थाय प्रदर्श्यते। **उत्तरोज्ज्वल-शृंगः स्यात्स्निग्धश्चातिमनोहरः। क्षेमं सुभिक्षमारोग्यं सर्वभूतेषु निर्दिशेत्।।** भारविणापि प्रणमन्त्यपायमुत्थितं प्रतिपच्चन्द्रमिव प्रजा नृपम् अत्र प्रतिपदि गणितीय-सिद्धान्तानुसारं चन्द्रदर्शनमसंभवात् प्रतिपच्छब्दात् ''प्रथमचन्द्रदर्शनमिति ज्ञेयं विद्वद्भिः'' रोग-निदाने ग्रहाणां प्रभावस्तद्दौष्ट्ये शान्तिः कार्यैव, विपर्यये चानिष्टमित्याह वसिष्ठः-**ग्रहेषु विषमस्थेषु यः शान्तिं न करोति सः।। अर्थहानिं च मरणं चाश्नुते सर्वसंकटम्।।** इति रोगदोषाधिव्याधिसमुच्चयं समापतति। ग्रहाणां शान्तिर्वसिष्ठसंहितोक्तप्रकारेण मत्स्यपुराणोक्तप्रकारेण वाऽनुष्ठेया। रोग-निदाने ग्रहाणां शान्तिकालःवसिष्ठः-**मासे मास्ययने चैव चन्द्रसूर्यग्रहेऽपि वा। विषुवत्रिकसंक्रान्तौ व्यतीपाते दिनक्षये** इति, ग्रहाणां दुष्टत्वाभावादेव शान्त्यभावः। एवं ग्रहणे नक्षत्रराहु-फलमपि, सूर्यचन्द्रोपरागयोः फलानि जन्मराशितः जन्मर्क्षे निधनं ग्रहे जनिमतोघातेति मुहूर्तचिन्तामणौ-अरिष्ट-निराकरणाय प्रतीकारः-

**इन्दोः सूर्ये यदि विधिवशात्सैंहिकेयावमर्द-**
**स्तद्राश्यानां भवति नियतं ग्रामपुंसां विनाशः।**
**तस्माच्छान्तिर्मुनिभिरुदिता तत्तदालोकपूर्वा,**
**कुर्याद्दाना-दिभिरिह नृणां नाशमायात्यरिष्टम्।।**

क्रमशः

**भारतीयज्योतिर्विज्ञानं, जयपुरम् ( राज. )**

# मुरारिबापुसूत्राणि

❑ डॉ. हर्षदेवमाधवः

**सीतारामलक्ष्मणेषु ज्ञानकर्मभक्तिधाराः –**

अस्माकं धर्मे ज्ञानमार्गः, कर्ममार्गः, भक्तिमार्गश्चेति त्रयो मार्गा उपदिष्टाः। यत्र केवलं रामो निवसति तत्र ज्ञानमार्गस्य सङ्केतः। यदा सीतया सह रामः तत्र ज्ञानभक्तिमार्गो वर्तते। लक्ष्मणो जाग्रदवस्थायाः प्रतीकमस्ति। लक्ष्मणः सदैव कर्मयोगी स्थितप्रज्ञः। अतः सीतारामलक्ष्मणेषु ज्ञानभक्तिकर्ममयस्त्रिवेणी-सङ्गमः वर्तते।

**विशुद्धप्रेमाश्रु ईश्वरादपि अधिकमहिमशालि–**

अश्रुबिन्दवः विश्वकरुणाप्रसूताः सन्ति। अश्रुबिन्दूनाम् इन्द्रियैः सह नास्ति सम्बन्धः। अश्रूणि संवेदनफलानि सन्ति। यस्य समीपे हृदयमस्ति स एव रोदिति। अश्रु इन्द्रियातीतमस्ति। रामः परब्रह्म, किन्तु भरतस्य प्रेम, भरतस्य अश्रूणि च परब्रह्मणोऽपि परं वर्तन्ते। भरतः भावाविष्टः बुद्धपुरुषः वर्तते। यदा भरतः राममयोध्यामानेतुं जगाम तदा सर्वे देवाः भयान्विताः बभूवुः। बृहस्पतिः भरतस्य बुद्धिं दूषितां कर्तुं न शशाक। सरस्वत्यपि निषेधं चक्रे। सा उवाच, 'अहं मन्थरायाः बुद्धिं परिवर्तयितुं शक्नोमि, किन्तु भरतस्य निश्चयं परिवर्तयितुं न मे शक्तिरिति।'

कृष्णावतारे वंश्याः या भावस्थितिः वर्तते सैव रामावतारे भरतस्य वर्तते। वंश्यां यथा कृष्णस्य नामैवास्ति तथैव भरतस्य चित्ते रामस्मरणं विना न किञ्चिदस्ति।

**'मन थिर करहु देव डरु नाहीं।**
**भरतहिं जानि राम परिछाहीं।।'**

अतः भक्ताश्रूणां महिमा शब्दैः न वाच्यः। अत एव भगवद्गीता भक्तस्य महिमानं गायति।

**सत्यस्य त्रिविधरूपाणि –**

सत्यं त्रिविधं भवति। एकं व्यावहारिकं सत्यम्। उपनिषद् कथयति, 'सत्यं वदेति। सत्यं विना विश्वव्यवस्था कठिना।' गोस्वामिनः वदन्ति–

**'सत्य मूल सब सुकृत सुभाए।**
**बेद पुरान बिदित मनु गाए।।'**

द्वितीयम् अस्ति 'सापेक्षं सत्यम्।' आईन्स्टाईन-महोदयस्य सापेक्षतावादः प्रसिद्धः। वयं भारतीयाः हिमालयम् उत्तरस्यां दिशि पश्यामः, किन्तु चीनदेशीयाः दक्षिणायां दिशि हिमालयं पश्यन्ति। अत्र एकं रूपं दृश्यते तत्र अपरं रूपं दृश्यते। अतः सत्यं सापेक्षं भवति। एकस्य सत्यमन्यस्मै असत्यं भवेदिति शक्यम्।

सत्यस्य तृतीयं रूपं 'निरपेक्ष-सत्यं' वर्तते। भगवान् बलेः त्रिविधसत्यस्य कामनां करोति। यदा साधकः निरपेक्षसत्यं प्रति गच्छति तदा भगवान् तं बन्धनस्थं करोति।

वस्तुतः ईश्वरो न कमपि बन्धनस्थं करोति, किन्तु जीवात्मा स्वात्मनः अहङ्कारवशात् बध्यते। बलेः दानवीरतायाः दर्पः तं बध्नाति।

**सगुणरूपमहिमशाली ईश्वरः –**

बुद्धः करुणामूर्तिः वर्तते। किन्तु पूर्वकाले पूर्वाश्रमे वा स नासीत् करुणामूर्तिः, अन्यथा तेन निशीथे राहुलस्य त्यागो न कृतः स्यात्। गुणरहितो निरर्थकोऽस्ति ईश्वरः। यः कोऽपि महिमा स सगुणस्वरूपस्य वर्तते। यदि खञ्ज ईश्वरः आगच्छेत् तर्हि अस्माभिः सह कः नृत्येत् ? हस्तरहित ईश्वरः अस्मान् कथं स्पृशेत् ? अत एव भक्तानां कृते ईश्वरोऽपि सगुणलीलां करोति। यथा ब्रह्मसूत्रे उक्तं, 'लोकवल्लीलाकैवल्यमस्तीति।'

**स्वभावानुरूपा सेवा कर्तव्या –**

ईसुख्रिस्तः सदैव अवदत्, 'अहं परमात्मनः पुत्रः।' अतः सर्वैः मिलित्वा तस्य नाशं कर्तुं योजना कृता। तस्य

वधार्थं राज्यसत्ता च धर्मसत्ता च एकीभूय प्रयत्नान् अकुरुताम्। एकदा महान् धर्मगुरुः ईसुं भोजनार्थं निमन्त्रयामास। न केनाऽपि पादप्रक्षालनार्थं जलमपि दत्तम्। अतः यः कोऽपि सेवितुम् इच्छति। सः सेव्यमानस्य स्वभावानुरूपां सेवां कुर्यादिति सेवायाः मन्त्रः। यः एकमपि रूप्यकं न वाञ्छति, तस्मै कोऽपि पञ्चलक्षरूप्यकाणि दद्यात् तदापि असौ प्रसन्नः न भवति। तदैव एका वाराङ्गना आगता। सा स्वस्य नेत्राश्रुभिः यीशुसमहाभागस्य चरणौ प्राक्षालयत् तदा ईसुख्रिस्तः तस्याः केशपाशेन स्वपादौ प्रामार्जयत्। अपि च सः वाराङ्गनायै अभयवचनम् अददात्।

**स्वाभाविकतायां नियमितता –**

ईसुख्रिस्तः अकथयत् यत्, 'यत्र सत्यं भवेत् तत्र अहं साक्षित्वे उपस्थितो भविष्यामीति।' स सदैव कथयति यत्, 'सदैव नियमिताः भवन्तु इति।' यदा कोऽपि स्वाभाविकतया आचरणं कुर्यात् तदा सः नियमितो भवेत्। अत्र वेदमन्त्रः प्रमाणं–

**'स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव।**
**पुनर्ददताघ्नता जानता सं गमेमहि।।'**

सूर्यचन्द्रौ नियमितौ भ्रमतः। कदापि प्रकृतिः नियमल्लङ्घनं न कुरुते। अत एव वेदः कथयति यत्, 'ऋतं च सत्यं च तपसोऽध्यजायत इति।'

# गोमाता सदैव पूजनीया

❑ डॉ. राकेश शास्त्री

**नमामि गोपादपंकजं करोमि गोमुखपूजनम्।**
**वदामि गोर्नाम निर्मलं वै स्मरामि गोतत्त्वमव्ययम्।।1।।**

**मंगलं मंगलेभ्योऽपि पावनं पावनेभ्योरेषा।**
**गोसेवा सदैवोत्कृष्टा सदैव मुक्तिदायिनी।।2।।**

**आर्ताः विषण्णाः शिथिलाश्च भीताः।**
**घोरेषु च व्याधिषु वर्तमानाः**
**संकीर्त्य गोपावनशब्दमेतत्**
**विमुक्तदुःखाः सुखिनो भवन्ति।।3।।**

**सकृदुच्चारयेत् यस्तु गोमातुर्नामातन्द्रितः।**
**शुद्धान्तःकरणो भूत्वा निर्वाणमधिगच्छति।।4।।**

**गोर्नाम नामैव, नामैव मनुज-जीवनम्।**
**कलौ नास्त्येव नास्त्येव, नास्त्येव गतिरन्यथा।।5।।**

**गोमातुरस्याः खुरन्यासपवित्रपांसुमपांसुलानाम्।।6।।**

**चिन्तयतु जन्मैतत् कथं संजातम्?**
**भक्षणाय मलविसर्जनाय खलु।**
**तत्तु पशवोऽपि कुर्वन्ति जगति**
**भवितुं भिन्नं कुरु त्वं भगवत्साधनाम्।।7।।**

**एतत् मम खलु पुष्टशरीरं**
**एतानि सुस्वादुव्यंजनानि।**
**चिन्तनमेतेषां नैवोचितम्।**
**मुक्त्यर्थं पुनः जन्मनि खलु**
**स्थिरचित्तो भूत्वा करोतु भगवत्साधनाम्।।8।।**

**''अहं किलास्मि संसारे सर्वं''**
**यद् वाञ्छामि तदेव करिष्यामि।**
**चिन्तनमेतत् नैव समुचितं**
**करोतु एकाग्रो भूत्वा प्रभु-साधनाम्।।9।।**

**संसारे भोगाः लिम्पन्ति मनुष्यं**
**त्वं नैवं कुरु तेषां ध्यानम्।**
**अतः कथयामि चेतयतु क्षिप्रं**
**कुरु त्वं मनसा वै साधनाम्।।10।।**

**1-जे-38, हाउसिंग बोर्ड कॉलोनी**
**बांसवाड़ा (राज.)**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# न्यायशास्त्रविमर्शको ग्रन्थः

व्याकरणं न्यायशास्त्रं चेति शास्त्रद्वयं वैदुष्यस्य सुप्रथितो निकष इति विदन्त्येव संस्कृतपण्डिताः। द्वयोरप्यनयोः शास्त्रयोः सुविशाल इतिहासः। सहस्राब्दीभ्यो व्याकरणस्य न्यायशास्त्रस्य च शास्त्रीया ग्रन्थाः प्रणीयमानाः सन्ति, तेषामध्ययनमध्यापनं चापि सहस्राब्दीभ्यः प्रचलतीत्यपि सुविदितम्। मूलतः शास्त्रलेखनं सूत्रपद्धत्या समभूत्। पाणिनिसूत्राणि व्याकरणस्यादिमो भाण्डागारः। तदुपरि शतशो भाष्याणि टीकाश्च व्यलेखिषत विद्वन्मूर्धन्यैः। एवमेव गौतमस्य न्यायसूत्राणि न्यायशास्त्रस्य प्रवर्तकानि तदुपरि भाष्याणि, टीकाः अन्ये च शतशो ग्रन्था गतासु शताब्दीषु विद्वद्भिर्व्यलेखिषत। सर्वेषामेवंविधानां ग्रन्थानां पठन-पाठनादिकं भारतीय-गुरुकुलेषु, विद्यापीठेषु विश्वविद्यालयेषु च प्रचलति। अनेन ग्रन्थराशिना सुमहान् ज्ञानराशिः प्रकटितो यस्यालोडनं विश्वविद्यालयीयैर्विद्वद्‌भिरद्यापि क्रियते।

यथा व्याकरणस्य पाठ्यक्रमः आचार्यकक्षापर्यन्तं सुतरां विस्तृतस्तथा न्यायशास्त्रस्यापि। एतस्मिन्नाकर-ग्रन्था अपि पाठ्यन्ते, टीका अपि। यदि पाठ्यक्रमे नियतानामेवंविधानां ग्रन्थानां सुसमावेशी विमर्शः (Digest इत्याङ्गलभाषायां प्रथितः) कुत्रचनो-पलभ्यते चेत् स छात्राणामध्यापकानां च कृते कियानुपकारकः स्यादिति सारल्येनानुमातुं शक्नुयुः संस्कृतसुधियः।

एवंविध एवैकः समावेशी सर्वग्राही च निष्कर्षो न्यायशास्त्रस्य कृते सपद्येव प्रकाशमायात इति ज्ञात्वा प्रसीदेयुः पाठकाः। सोऽयं ग्रन्थोऽस्ति जोधपुरस्थेन सुप्रथितेन राष्ट्रपतिसम्मानितेन विदुषा प्रो. डॉ. गणेशीलालसुथारवर्येण विविधभाष्यटीकादिग्रन्थानां विलोडनानन्तरं सर्वेषां समावेशं विदधता विलिखितो ग्रन्थः ''न्यायसूत्रतात्पर्यसमीक्षा'' इति शीर्षकं बिभ्राणः।

डॉ. गणेशीलालसुथारमहाभागो वेदविज्ञान-विचक्षणस्य जयुपरधरामण्डलभूतस्य समीक्षा-चक्रवर्तिनः श्रीमधुसूदनओझामहोदयस्य ज्ञानराशेः प्रसारकत्वेन सुविदितोऽस्ति राजस्थानधरायाम्। जोधपुर विश्वविद्यालये 37½ वर्षाणि संस्कृतविभागे प्राध्यापक-सहाचार्य-आचार्यादिपदान्यधिष्ठितवान्। मधुसूदनओझाशोधप्रकोष्ठनिदेशकपदे च कृतकार्यः प्रो. गणेशीलाल सुथारवर्यः 16 ग्रन्थान् प्रणीतवान्। बहुभ्यो वर्षेभ्यो न्यादर्शनं पाठयता तेनानुभूतं यन्न्यायशास्त्रास्य पूर्णतः परिज्ञानाय के के विषयाः सम्यगधीतव्याः, तेषां च सम्यग् विवेचनं केषु सूत्रेषु केषु भाष्येषु केषु च विमर्शग्रन्थेषु प्राप्यते। सर्वमिदं विमृश्य ग्रन्थेऽस्मिन् गौतमीयमूल-सूत्रोद्धरणपुरस्सरं तेषां सुप्रतिष्ठितभाष्येभ्यस्तदुदाहरणानि विमर्शाश्च प्रस्तुवता लेखकेन न्यायशास्त्रीया विषयाः सम्यगुपन्यस्ताः।

एवंविधा भाष्यकारा, वार्तिककारा, व्याख्या-काराश्च गतासु शताब्दीषु बहवोऽभूवन्। एतेषु प्रमुखा

नव विमर्शका परिगण्यन्ते, न्यायभाष्यकारो वात्स्यायनः, न्यायवार्तिककार उद्योतकराचार्यः, तात्पर्यटीकाकारो वाचस्पतिमिश्रः, तात्पर्यपरिशुद्धिकार उदयनाचार्यः, न्यायालङ्कारलेखकः अभयतिलकोपाध्यायः, न्याय मञ्जरीकारो जयन्तभट्टः, न्यायतात्पर्यदीपिकाकारो भट्टवागीशः, गौतमीयसूत्रप्रकाशलेखकः केशवमिश्रः, न्यायसूत्रवृत्तिकारो विश्वनाथन्यायपञ्चाननश्चेति। महाविशालस्य न्यायदर्शनस्यानेके सिद्धान्ताः गतशताब्दीषु विद्वन्मण्डले विसृष्टा अभूवन्। तेषां मूलं तु न्यायसूत्रेषु भवेदेव, किन्तु परवर्तिभिर्भाष्यकारैस्तेषां यद् विवेचनं कृतं तस्मिन् वैविध्यं परिदृश्येतेति स्वाभाविकमेव। तस्य वैविध्यस्य किं रूपं, कथं समये समये तस्य सिद्धान्तस्य प्रमाणस्य वा विवेचनं कैः कैः भाष्यकारैः कथं विहितमिति स्पष्टीकृत्य छात्रान् परिबोधयेयुराधुनिका विश्वविद्यालयीया आचार्या इत्यद्यतनी अपेक्षाऽस्तीत्यनुभवेयुरेव विद्वत्प्रवराः।

छात्रान् पाठयता डॉ. गणेशीलाल सुथारेणेयमपेक्षा नूनमनुभूतैव स्यात्। तामपेक्षां पूरयितुं तेनाऽयं ग्रन्थः प्रणीतो यत्र गौतमसूत्राणि प्रथममुद्धृतानि, ततस्तेषां विमर्शः, स्वकीयमभिमतमप्यन्ते प्रदर्शितम्। प्रथमाध्यायस्य प्रथमे आह्निके त्रिसूत्रीविमर्शः प्रमाण-प्रमेय-पूर्वाङ्गाश्रयसिद्धान्तोत्तराङ्ग-लक्षणादीनां विवेचनं च ग्रन्थस्य पूर्वार्धे प्रकाशितं, प्रथमाध्यायस्य द्वितीयाह्निके कथाभेद-हेत्वाभास-छल-पुरुषशक्ति-लिङ्गदोषसामान्यादिविषया ये समाविष्टास्ते ग्रन्थस्यास्योत्तरार्धे मुद्रिताः। अन्ते सन्दर्भग्रन्थानां सूची मुद्रिता यत्र संस्कृते, हिन्द्याम्, आङ्गलभाषायां च न्यायशास्त्रप्रस्तोतारो ये ग्रन्था विश्वविद्यालय-शिक्षोपकारिणस्तेषां नामोल्लेखः प्रकाशनवर्षश्च सूचितः।

हर्षस्यायं विषयो यद् ग्रन्थस्यादौ भारतविश्रुतानां विदुषां शुभाशंसाः पुरोवाचश्चापि मुद्रिताः सन्ति। नवदेहलीस्थानां विद्वन्मूर्धन्यानां संस्कृताऽऽयोगाध्यक्षाणां प्रो. सत्यव्रतशास्त्रिवर्याणां पुरोवाक्, तदनु सकलशास्त्रविचक्षणानां बैंगलूरूवास्तव्यानां म.म. प्रो. प्रह्लादाचार्याणाम् ''अभिप्रायः'', तदनु जोधपुरविश्वविद्यालयीयसंस्कृतविभागाध्यक्षस्य प्रो. सत्यप्रकाश दुबेवर्यस्य ''नैवेद्यम्'' मुद्रितमस्ति (लेखकीयभूमिकाया ''औपोद्घातिकम्'' इति शीर्षकं बिभ्राणायाः पूर्वं) एतेषु सर्वैरेव ग्रन्थस्येयं पद्धतिरभिनन्दिता यदत्र पूर्वसूचितानां नव भाष्यकाराणामभिमतानि तु प्रदर्शितान्येव, अन्ते प्रतिसूत्रं प्रतिविषयं च तेषां समीक्षा लेखकेन प्रस्तुता यत्र सर्वाङ्गीणो विमर्शो द्रष्टुं शक्यते।

नूनमयं ग्रन्थः प्रौढविदुषामपि परमं सन्तोषं जनयिष्यति, विश्वविद्यालयेषु, गुरुकुलेषु, संस्कृतसंस्थानेषु च न्यायशास्त्राधीतिनामध्यापकानां च सुमहान्तमुपकारं विधास्यतीत्यस्य पदार्पणोपलक्ष्ये वर्धाप्यते ग्रन्थकारः प्रो. गणेशीलाल सुथारः, प्रकाशकाः प्रकाशनसहयोगिनश्च सर्वे।

**न्यायसूत्रतात्पर्यसमीक्षाः ले. प्रो. डॉ. गणेशीलाल-सुथारः प्रका. रायल पब्लिकेशन 18, शक्तिकालोनी, गली नं. 2, लोकोशेड रोड, रातानाडा, जोधपुर (राज.) पृ. सं. 260 मूल्यम् 500/-.**

श्रीमतां बाबासाहेबआप्टेमहोदयानां व्यक्तित्ववर्णने-

षड्विंशः प्रसङ्गः

# आसामप्रान्ते पुनर्जन्मसंकल्पः

❑ वेणीमाधव गो. धर्माधिकारी

गताङ्कादग्रे-

आसामप्रान्तप्रचारकाः श्रीकान्तजोशीमहोदया एवाग्रे वर्णयन्ति-विगतवर्षे गोहाट्यां सम्पन्नस्य संघशिक्षावर्गस्य समापनकार्यक्रम आसीत्। कार्यक्रमस्तु प्रातरेव समाप्तिमगात्। मध्याह्ने किञ्चिद् विश्रम्य वयं सर्वे असमप्रान्तप्रचारकाः बाबामहोदयानां समीपे एकत्रिताः। इदं तु नित्यकार्यमेवासीद् यद् बाबा-महोदयानां समीपे एकत्रीभूय वयं सर्वे बालवद् हासोपहासमयीं चर्चां कुर्वन्त आस्म। यतो बाबामहोदयाः स्वयमपि एतासु बालोचितासु प्रेमपूरितासु वार्त्तासु रसास्वादं गृह्णन्ति स्म।

तदा चास्माभिरयमेव विषादः समुपस्थापितो यदसमप्रान्ते तेषां प्रवासोऽतितरां न्यूनः संजातः। अस्मिन् विवादे बाबामहोदया अपि सम्मिलिता अभूवन्। तेषां कथनमासीद्यत्ते बहुवारमसमप्रान्ते समागता इति। यदा प्रभृति असमप्रान्ते संघकार्यस्य प्रारम्भः संजातस्तदाप्रभृति ते असमप्रदेशे एवाधिक-रूपेण समागताः। श्रीमधुकरलिमये महाभागाः असमप्रान्ते प्राचीनतमाः प्रचारकाः आसन्। स्वस्मरणशक्तिं घर्षयद्भिस्तैरस्माकं समर्थने तेषां प्रवासस्य गणना समारब्धा। बाबामहोदयाः कदा कदा असमप्रान्ते समागताः, कतिदिवसपर्यन्तं च तैरत्र विश्रामः कृत इति गणना समारब्धा। महदानन्द-पूर्वकमस्माभिरिदं स्वीकर्त्तुं प्रयत्नः कृतो यद् बाबा-महोदयैरधिकः समयो असमप्रदेशार्थं देयः।

अन्ते चास्माकं सफलता तेभ्योऽपि स्वीकरणी-यासीद्। तैः स्वीकृतं 1965 ई. वर्षानन्तरमसमप्रदेशे पूर्णविस्तरेण तेषां भ्रमणं न संजातमिति। तदा तु वयं बालहठं कुर्वाणा अवदाम, बाबामहोदय ! भवद्भिः स्वीकृतमत्रभवद्भिरधिकं भ्रमणं करणीयमिति। अस्माकमिच्छायां प्रसन्नतां प्रकटयद्भिस्तैः कथितं यत्ते अस्मिन्नेव वर्षे असमप्रदेशस्य प्रमुखस्थानेषु भ्रमणार्थ-मागमिष्यन्तीति।

परं भगवदिच्छा त्वन्यैवासीद्। संभवतः तेऽपि कल्पयन्ति स्म ताम्। अत एव वार्त्तालापस्यान्ते ते गम्भीरतापूर्वकमवदन्-आसामप्रान्ते संघकार्य- करणं सत्यमेव कठिनमस्ति। परं संकटानामुपरि विजयप्राप्तिं प्रत्यङ्गुलिनिर्देशं कुर्वन्तस्ते अवदन्-असमप्रान्ते संघकार्यस्य प्रगतिरतिमन्दा किमस्ति? कर्मठाः कार्यकर्त्तारः कार्यं कुर्वन्तः सन्त्यथापि प्रगतेः समाधानं श्रेष्ठतरं किं न भवति? प्रश्ना ह्येते तैः स्वात्मानं प्रत्येव कृतास्तथापि तेऽस्माकं कार्यकुशलतया सम्बद्धाः सन्ति। अत एव च तैः गम्भीरतापूर्वकं कथितम्-अस्यां वृद्धावस्थायां त्वत्रागत्य कार्यं कर्त्तुं न शक्नोमि। परं भगवन्तमिदमेव प्रार्थये यदग्रे असमप्रान्ते एव मे पुनः जन्म स्याद् येन कार्यं कृत्वा प्रत्यवबोधयिष्यामि सर्वान्।

एकं जन्म एव न अनेकानि जन्मान्यपि व्यतीतानि भवेयुस्तथापि कार्य पूर्त्तेर्निश्चयं विधाय ये चलिष्यन्ति त एव संघकार्यस्य धुरौ सत्स्वपि संकटेष्वग्रे ततोप्यग्रे केवलमग्र एव नेतुं समर्थाः विजयिनश्च भविष्यन्ति इति तस्यां चर्चायां निस्सृतो भावोऽद्याप्यस्मदन्तश्चक्षुषोर्मध्ये विराजते।

**ब्रह्मपुरी, जयपुरम्**

# अथ द्वितीया पंचाशिका प्रारभ्यते

❑ श्रीमती आराधना धर्माधिकारी

## साधुवादस्य मूल्यम्

**सद्गुरुं गणनाथं च शारदां कुलदेवताम्।।**
**नमस्कृत्याद्य क्रियते अग्रे कार्यप्रवर्द्धनम्।।**
**पंचाशतीद्वितीयेयं बालरंजनहेतवे।।**
**क्रियते च मया पत्न्या वेणीमाधवशर्मणः।।**

कन्नौजशासकेन महाराजेन हर्षेण कश्मीरराज्य-सिंहासने मातृगुप्तस्याभिषेकः कृतः। मातृगुप्तस्योदारतया, कलाप्रियतया, दानशीलतया चाकृष्टैर्महद्भिर्विद्वद्भिः कविभिश्च कश्मीरराजसभा राजते स्म। महाकविर्मेण्ठ-स्तत्कालीनेषु प्रसिद्धेषु कविषु श्रेष्ठः परिगण्यते स्म। एकदा स महाराजस्य मातृगुप्तस्य राजसभायां समागतः। महाराजेन महता आदरेण तस्य स्वागतं कृतम्। मातृगुप्तः महाकविं स्वं प्रसिद्धं काव्यं हयग्रीववधं श्रावयितुं प्रार्थयामास। महाकविर्मेण्ठः पूर्वं राजप्रशस्तिमगायत्। ततश्च काव्यं श्रावयितुमारभत। समस्ता राजसभा काव्यामृतश्रवणेनान्दोलिता। परं मेण्ठस्य वदनमुदासीन-मिवासीत्। तस्य नेत्रयोराश्चर्येण सह दुःखमप्यासीत् यदियतीं मनोहारिणीं कवितां श्रुत्वापि राज्ञा एकदापि साधुवादो न प्रदत्तः। कविर्मेण्ठोऽचिन्तयद् राज्ञा पूर्वं दरिद्रता भुक्ता अधुना च मां स्वस्माल्लघुं गणयति। स्वरचनायां राज्ञे गर्वः संवृत्तः। राज्ञः पुरस्कारस्याप्याशा कर्तुं न शक्यते। काव्य-श्रवणानन्तरं मेण्ठः खिन्नेन मनसा पत्राणि समाहर्तुं प्रारभत। सहसा मातृगुप्तः पत्राणामधः स्वर्णपात्रमेकमस्थापयत्। विदुषां राजमंत्रिणामाश्चर्यस्य सीमैव नासीत्। अस्य न काप्यावश्यकता महाराज! कविना कथितम्। मातृगुप्तेन कथितम्-एवं किं वदसि मित्र? अस्यां रचनायां कियदमृतं पूरितमस्ति। यद्यस्या एकं पत्रमपि भूमौ पतितं स्यान्मह्यं कियती पीडा भवेत्? अहं धन्योऽस्मि वयस्य! मातृगुप्तः सिंहासनादुत्थाय कविं हृदयेनायोजितवान्। जयतु महाकविः, जयतु महाराजः, इति जयघोषः समभवत्।

**ब्रह्मपुरी, जयपुरम्**

संस्कृत समाचार

# ''खग-वाटिका' अभियानम्



''संस्कृतभारती'' जयपुरमहानगरद्वारा ''**खग-वाटिका**'' अभियाने शताधिकाः खगवाटिकाः स्थापिताः। अस्मिन् अभियाने जयपुरनगरस्य विभिन्नेषु स्थानेषु खग-वाटिकायाः स्थापना कृता। यत्र पक्षिणां कृते अन्नस्य जलस्यच व्यवस्था कल्पिता वर्तते। खगानां क्रीडायै वाटिकायां प्रेंखाया व्यवस्था अपि कृता। अभियानस्य आरम्भे चिकित्सामंत्रिणाः कालीचरणसराफमहोदयेन स्वगृहे खगवाटिका स्थापिता। एवमेव जयपुरस्थपुलिसस्थानकेषु, विभिन्नेषु मन्दिरेषु अपि खगवाटिकाः स्थापिताः।

अस्मिन्नेव क्रमे ''संस्कृतभारती'' जयपुरमहानगर-कार्यालये अपि 29 मई दिनांके खगवाटिका स्थापिता। अस्मिन् कार्यक्रमे पार्षद मान पंडितः, अध्यक्षः सं.भा. जयपुरप्रान्तः श्रीहरिशंकरभारद्वाजः, अध्यक्षः सं.भा.ज. महानगरं श्रीप्रकाशः, विद्याभारत्याः अ.भा. संस्कृतप्रमुखः गणेशकुलकर्णी, प्रान्तसम्पर्कप्रमुखः डॉ. रघुवीरप्रसाद शर्मा, महानगरमंत्री संतोषशर्मा, शिक्षणप्रमुखः मनीष शर्मा, जोधपुरप्रान्तमंत्री तगसिंहराजपुरोहित, विष्णु शर्मा, प्रो. प्रमोदशर्मा, भारतभूषण, मनोजः, देवीप्रसादः, डॉ. संध्या अग्रवाल (MPS जवाहरनगरं), रश्मिका इत्यादयः कार्यकर्तारः उपस्थिताः आसन्।

अनुभवकथा

# मातृदिवसः

❑ ऋषिराजजानी

नैमिषविश्वविद्यालयस्य अनुस्नातककक्षे सर्वे छात्राः उपविष्टाः। तदा डॉ. सूतदेवः पुराणी कक्षं प्रविष्टः। डॉ. पुराणी पुराणविभागाध्यक्षः आसीत्। छात्रेषु सः अतीव प्रियोऽपि आसीत्। सर्वे छात्राः उत्थाय तस्य अभिवादनं कृतवन्तः। डॉ. पुराणी छात्रान् प्रति ईषत् स्मितं कृत्वा पृष्टवान्, ''मम प्रियछात्राः ! अद्य यूयं किं पठितुम् इच्छथ? तदानीं पुरतः काष्ठफलके आसीनः शौनकः उक्तवान्,'' महोदय ! अद्य अस्मभ्यं पुराणेषु मातृस्वरूपं स्पष्टीकरोतु। माता काऽस्ति च मातुः जन्म कथं बभूव? मातुः उत्पत्तिकथां, तस्याः कार्याणि च वयं ज्ञातुम् इच्छामः। शौनकः विश्वविद्यालये परीक्षासु शिखरस्थः छात्रः आसीत्। पुराणीमहोदयस्य सर्वेषु व्याख्यानेषु स अवश्यमेव प्रतिदिनम् उपस्थितः भवति स्म। अतः सः पुराणीमहोदयस्य प्रियशिष्यः आसीत्।

स्वोपनेत्रस्य स्थूलकाचात् पुराणीमहोदयः शौनकम् अपश्यत् अवदच्च, 'समीचीनः प्रश्नः, शौनक ! साधु पृष्टम्। अद्याहं मातृस्वरूपं मातृमाहात्म्यं च वर्णयिष्यामि। सामान्यतः प्राकृतजनाः मातरं साधारणनारीं मन्यन्ते।' किन्तु माता अव्याख्येयपदमस्ति। मातृतत्त्वमवगन्तुम् अतिकठिनं वर्तते। तस्याः महिमानं ज्ञातुं ब्रह्मादयोऽपि न समर्थाः। मातृपदं नित्यं शाश्वतं च जन्मादिरहितं वर्तते किन्तु प्रतियुगं सा समुत्पद्य स्वसंततिषु स्नेहवृष्टिं करोति। केचिद् ऋषयः वदन्ति यद् ब्रह्मा सृष्टेः भारवहनकार्यं दुष्करमिति मत्वा मातरं ससर्ज। किन्तु केचिद् ऋषयः वदन्ति यत् मातृतत्त्वम् अनादि वर्तते। तस्य वर्णनम् अशक्यम्।

इत्युक्त्वा डॉ. पुराणी क्षणं व्यरमत। शौनक उक्तवान् ''महोदय ! एतत् सर्वम् अस्माभिः ग्रन्थेषु पठितम्। किन्तु यद् अस्माभिः न ज्ञातं तद् वयं ज्ञातुम् इच्छामः। कृपया विस्तरेण मातृतत्त्वं निवेदयतु।''

शौनकस्य कथनं श्रुत्वा डॉ. पुराणी ईषद् विहस्य स्वस्यूताद् एकां प्राचीनां पाण्डुलिपिं बहिराकर्षयत्। सर्वे छात्राः तां पाण्डुलिपिं सावधानं पश्यन्ति स्म। पाण्डुलिप्यां कानिचित् तालपत्राणि आसन्। तेषु नातिस्पष्टाक्षरेषु लेखनमासीत्। अत्रान्तरे द्वितीये काष्ठफलके उपविष्टो गालवः पृष्टवान्, 'महोदय! इयं का पाण्डुलिपिः? कस्मिन् विषये लिखिता? डॉ. पुराणी पाण्डुलिप्याः पत्राणि व्यवस्थितानि कृत्वा अवदत्,' ''गालव ! इयं प्राचीना पाण्डुलिपिः ब्राह्मीलिप्यां लिखिता। इदं महर्षि-व्यासरचितं 'मातृपुराणम्' इति कथ्यते। मम जर्मनीस्थमित्रेण डॉ. एरिक ज्योर्जेन मह्यमिदं प्रदत्तम्।''

शौनकगालवादयः सर्वे डॉ. पुराणीं सावधानम् अशृण्वन्। सूक्ष्मदृष्ट्या पाण्डुलिपिं विलोक्य पुराणी-महोदयः अवदत्, 'भवतु! अद्य अहं युष्मभ्यं मातृपुराणस्य प्रथमाध्यायस्य कथां श्रावयिष्यामि।'

अग्रे स्थिताः छात्रा व्याख्यानस्य मुख्यांशान् लेखितुं प्रारभन्त। पृष्ठे स्थिताः छात्राः परस्परं वार्तालापं विहाय श्रोतुं दत्तकर्णा जाताः।

पुरा किल महाप्रलयस्य पश्चात् पद्मासनस्थितः ब्रह्मा नवसृष्टिनिर्माणार्थं प्रयत्नं चकार। ब्रह्मा सर्वप्रथमं ग्रहान्, नक्षत्राणि ब्रह्माण्डं च ससर्ज। ततः सः सूर्य-चन्द्र-गगन-समुद्र-वृक्ष-वन-नदी-पर्वत-पक्षि-पशु इत्यादि सृष्टिं

रचयामास। किन्तु ब्रह्मा स्वसर्जनेन हर्षं न लेभे। नद्यः आसन्, किन्तु तासु तरङ्गा नासन्। पर्वता आसन् किन्तु तेषु स्थैर्यं नासीत्। वृक्षाः अरण्यानि आसन्, किन्तु तेषु ऋतूत्सवो नासीत्। पशवः आसन् किन्तु तेषु चैतन्योत्साहो नासीत्। विहगा आसन् किन्तु तेषु गीतमाधुर्यं नासीत्। सूर्यचन्द्रयोः प्रकाशः आसीत् किन्तु तयोस्तेजोविस्तारो नासीत्। आकाशस्य अमेयो विस्तार आसीत् किन्तु औदार्यं नासीत्। समुद्राः आसन् किन्तु तेषु मन्दम् आक्रन्दनं श्रूयते स्म। संक्षेपेण सृष्टेः भौतिकदेह आसीत् किन्तु तत्र आत्मनः लीला नासीत्। अतः ब्रह्मा चिन्ताव्यग्रो बभूव।

दीर्घं विचार्य ब्रह्मा स्वक्षतिम् अजानात्। अतः ब्रह्मा मातरं ससर्ज। ततः पश्चात् नदीषु तरङ्गाः जाताः। ताः प्रावहन्। पर्वतेषु स्थैर्यं धैर्यं च जातम्। वृक्षेषु अरण्येषु च वसन्तोत्सवा जाताः। पशवः स्वापत्येषु स्नेहम् अकुर्वन्। विहगाः स्वकलरवैः गगनस्य विस्तारम् अपूरयन्। सूर्यचन्द्रौ दिवसरात्रियुग्मस्य निर्माणम् अकुरुताम्। गगनं सस्नेहं पृथ्व्याम् अनमत्। समुद्रः मुदितामयं गानम् अकरोत्। ब्रह्मणः निर्जीवसृष्टौ चैतन्यं प्रविष्टमिव लक्ष्यते स्म।

माता ब्रह्माणम् अपृच्छत्, 'हे पितामह ! मम हृदयं स्नेहाप्लावितं वर्तते। मम प्रेम अहं कस्मिन् वर्षयिष्यामि?' ततः पश्चात् ब्रह्मा पितुः सर्जनं चकार अपि च पुत्रीपुत्रयोः युग्मं ससर्ज। माता स्वयं तौ परिष्वज्य वारं वारम् अचुम्बत्। ब्रह्मा मात्रे एकां मञ्जूषां ददौ कथयामास च ''वत्से ! इमां मञ्जूषां रक्षतु अपि च त्वया विना न कोऽपि तामु नोद्घाटयेद् इति ते कर्तव्यम्।'' ततः पश्चात् मातुः संसारचक्रं प्रावर्तत। माता प्रातःकाले सस्नेहं बालकौ उदबोधयत्, अस्नापयत्, अक्रीडयत्, अखादयत्, अपाठयत् अपि च लाडगीतं गीत्वा अस्वापयत्। सा तौ अत्यन्तम् अहासयत्। अतः तस्याः बालकौ भृशं अहसताम्। तौ हसन्तौ वीक्ष्य माताऽपि अहसत्। अतः मातरं हसन्तीं वीक्ष्य नद्यः, पर्वताः, वृक्षाः, वनानि, सूर्यः, चन्द्रः, समुद्रः, गगनं, पशवः, विहगाः - ते सर्वे हसन्ति स्म। बालकौ स्वापयित्वा माता स्वपिति स्म। अपरेद्युः बालयोः जागरणात् पूर्वमेव सा ब्रह्मणः मञ्जूषायाः समीपम् अगच्छत्। सा निःशब्दमेव मञ्जूषामीषद् उद्घाट्य किञ्चिद् गृहीत्वा पुनरपि तां पिहितामकरोत्। पुनरपि सा तालकेन तां पिधाय कुञ्जिकां गुप्तस्थाने न्यवेशयत्। एवं माता स्वदिवसान् ससुखमत्यवाहयत्।

एकदा पुत्रकः सहसा जागरितः । स मातरं मञ्जूषाम् उद्घाटयन्तीमपश्यत्। स अपृच्छत्, 'मातः! अस्यां मञ्जूषायां किमस्ति ? भवत्या मञ्जूषायाः किं गृहीतम्? माता प्रत्युदतरत्,' ''पुत्रक! इयं मञ्जूषा अतीव पुराणी वर्तते। तत्र किमस्तीति मया विलोकितम्।'' किन्तु बालकस्य जिज्ञासा शान्ता न जाता। तदनन्तरं बालकः प्रतिदिनं शीघ्रं जागरितो भूत्वा मातुः चेष्टां व्यलोकयत्। स तस्य भगिन्यै रहस्यमयीमञ्जूषायाः वृत्तं न्यवेदयत्। सः अवदत्, ''भगिनि ! माता आवाभ्याम् किञ्चिद् रहस्यं गोपयति। अतः रात्रौ आवां मातुः शयनोत्तरं मञ्जूषाम् उद्घाटयिष्यावः।''

तस्यां रात्र्यां माता बालकौ स्वापयित्वा अतीव श्रान्ता अस्वपत्। निशीथे बालकौ उत्थाय कुञ्जिकाम् अन्विष्य मञ्जूषाम् उद्घाटयताम्। पुत्रः मञ्जूषायाः पिधानं अपावृणोत्। पिधाने अपिहिते जाते महान् तुमुलशब्दः अभवत्। मातुः निद्राभङ्गोऽभवत्। यदा सा मञ्जूषायाः समीपे आगतवती, तदा तस्याः बालकौ निश्चेतनौ आस्ताम्। माता अपत्ये क्रोडे निधाय उच्चैः रोदितुं प्रारभत

अपि च सा अवदत्, 'धिक्! कीदृशोऽनर्थः जातः? कस्मात् वा मञ्जूषाम् उद्घाटयताम्? तस्यां मञ्जूषायां ब्रह्मा संसारस्य सुखदुःखे न्यक्षिपत् ! इमां मञ्जूषाम् उद्घाट्य प्रतिदिनम् अहं दुःखं स्वयं गृहीतवती अपि च सुखं संसाराय व्यतरम्। युवां मञ्जूषां निकामम् उद्घाट्य समग्रं दुःखं बहिः आनीतवन्तौ। युवां बालौ कथं समग्रदुःखभारं वोढुं क्षमौ? हे परमेश्वर ! भवता किं कृतम्?' इत्युक्त्वा माता भृशम् अरोदीत्। मातरं रोदनं कुर्वन्तीं वीक्ष्य जनकः अरोदीत्। तस्यां रात्र्यां सरितोऽपि अरुदन्। पर्वताः, चन्द्रमाः, सूर्यः गगनं, नक्षत्राणि, वृक्षाः, वनानि, समुद्राः, पशवः, विहगाः – एते सर्वे व्याकुला भूत्वा अरुदन्। कदाचित् अस्याः रात्र्याः पूर्वं संसारः दुःखं किमस्तीति न अजानात्। यतो हि संसारस्य समग्रं दुःखं माता स्वयमेव गृहीतवती। सूर्योदयकाले तु समग्रमपि ब्रह्माण्डं शोकाप्लावितम् अभवत्। ब्रह्माऽपि रुरोद। हंसवाहनः ब्रह्मा सत्वरं मातुः समीपे आजगाम। स उवाच, ''समाश्वसिहि वत्से ! आक्रन्दनं मा कुरु। तव विलापेन मम सृष्ट्याः विनाशः भविष्यति।'' माता प्रत्युवाच, ''हे पितामह ! मम अपत्ये चेतनरहिते पतिते स्तः। कथम् अहं सान्त्वनं प्राप्नोमि ? मया मम कृते न कदाचित् किमपि याचितम्। किन्तु अधुना अहं मम बालकाभ्याम् पुनर्जीवनस्य वरं याचे।''

ब्रह्मा 'तथास्तु' इत्युवाच तदैव पुत्री पुत्रौ पुनर्जीवनं प्राप्तवन्तौ अपि च पुत्रीपुत्रौ मातुः क्रोडे आगतौ। ब्रह्मा पुनरुवाच, ''अस्यां मञ्जूषायां पुनरपि अहं सुखदुःखे निक्षिप्य मञ्जूषाम् पिहितां करोमि। किन्तु यदि पुनरपि कोऽपि इमां मञ्जूषाम् उद्घाटयिष्यति तर्हि अहं न किमपि साहाय्यं कर्तुं क्षमः।'' इत्युक्त्वा ब्रह्मा अन्तर्हितो बभूव।

तदनन्तरं मातुः संसारचक्रं पुनरपि प्राचलत् पूर्ववत्। किन्तु माता सदैव मञ्जूषाविषये चिन्तातुरा आसीत्। अन्ततो गत्वा सा तां मञ्जूषां स्वहृदये स्थापयामास। ततः पश्चात् प्रत्यहं सा दुःखं स्वहृदये निधाय सुखं संसाराय व्यतरत्। मातुः हृदयं दुःख सन्तप्तमासीत् किन्तु तस्याः मुखे हास्यमेव अवर्तत। तदारभ्य मात्रा ब्रह्मणो न किञ्चिद् याचितम्। तया प्रतिदिनं संसारसुखार्थं प्रार्थना कृता।

यस्मिन् दिवसे ब्रह्मा बालकाभ्यां पुनर्जीवनं ददौ तस्मिन् दिवसे संसारे मातृत्वस्य विजयो जातः। गच्छता कालेन स एव दिवसः 'मातृदिवस' इति प्रसिद्धिं लेभे। मातृपुराणस्य इममध्यायं मातृदिवसे सश्रद्धं यः पठति, स अक्षयफलं प्राप्नोति। या माता अस्य अध्यायस्य एकवारं पाठं करोति, तस्याः सन्ततिः विपत्तिरहिता च रोगमुक्ता च भवति। या माता द्विवारं पठति, तस्याः सन्ततिः धनधान्ययुक्ता भवति। या माता त्रिवारं पठति, तस्याः कुलस्य महापापं विनश्यति। या सन्ततिः मातृदिवसे अस्य पाठं करोति, तस्याः मातरि स्नेहः शतगुणो भवतीति शास्त्रवाक्यं– तत्र न संशयः। यो मातृपुराणं पठति वा शृणोति तस्य माता वृद्धाश्रमं न गच्छतीति ब्रह्मवाक्यम्। मातृदिवसे या माता स्वसन्तत्यै यत् किञ्चिद् याचते तद् अवश्यम् ईश्वरो ददाति।

डॉ. पुराणी शिरः उन्नतं कृत्वा अपश्यत्। स उपनेत्रं प्रामृजत् कराञ्चलेन। शौनकादयः छात्राः टिप्पणीपुस्तकं पिहितम् अकुर्वन्।

यदि त्वं पृच्छसि यत् त्वम् इमां कथां जानासीति? तर्हि अहं प्रत्युत्तरामि, 'भो महोदयाः! डॉ. पुराणी–महोदयस्य कक्षायां शौनकस्य पार्श्वे अहमेव आसम्। अपि भवता न दृष्टोऽहम्?

८, राजतिलक बंगलोज, आबादनगर,
बसस्टोप के पास, बोपल, अहमदाबाद–380058

# श्वेताश्वतरोपनिषदि योगः

❑ डॉ. उषाकिरण यादवः

वैदिकवाङ्मये योगस्य विस्तृतं वर्णनमुपनिषत्सु विद्यते। उपनिषदां श्वेताश्वतरोपनिषदेका प्रसिद्धा उपनिषदस्ति। लेखोऽयमेतदाश्रितोऽस्ति। तपसः प्रभावाद् देवस्य कृपया च विद्वान् श्वेताश्वतराख्य ऋषिः ऋषिभिः सम्यगाचरितं परमं पवित्रं ब्रह्मज्ञानं संन्यासिभ्यो प्रोवाच। उपनिषदः आरम्भ ओङ्कारस्मरणपूर्वकं ब्रह्मवादिनां वार्तालापेन भवति। पारस्परिके विचारविमर्शे कृते तैः सृष्टेर्मानवसंरचनायाश्च कारणमधिष्ठाता सुखदुःखमयी व्यवस्थाऽन्ये च विषयाः विचारिताः आसन्। विचारे कृते यदा तैर्यथार्थज्ञानं प्राप्तन्तदा सर्वैरेवान्य उपायः समाश्रितः। एष उपायोऽत्र ध्यान-योगनाम्नाऽभिहितः। उपायेनानेन तैरेका स्वगुणैर्निगूढा देवात्मशक्तिः दृष्टा ज्ञातञ्च सत्यमिदं यदेको देव-कालात्मादीनां संयुक्तानामखिलानामन्येषां कारणानाम-धिष्ठाताऽस्ति।

''ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढाम्'' यः कारणानि निखिलानि तानि कालात्मयुक्तान्मधितिष्ठत्येकः। अनेन ध्यानयोगेन तैर्जगतः यथार्थकारणस्य ज्ञानेन सह तस्य स्वरूपं जीवात्मनः प्रकृतेश्च ज्ञानन्तत्त्वानां संख्या तेषामन्यो-न्याश्रितताभेदाश्च अपि परिज्ञाताः। ब्रह्माण्डसृष्टिरत्र ब्रह्मचक्ररुपे मानवसृष्टिश्च नदीरूपे वर्णिताऽस्ति। अत्र रहस्यज्ञानमिदमुद्घाटितं यन्प्रधानं क्षरमस्ति। अमृतमक्षरं हरो विद्यते। एष देव एकाक्येव क्षरस्य जीवात्मनश्च स्वाम्यस्ति। तस्य ध्यानाद्योजनात्तत्त्वभावाच्च जीवात्मा विश्वमायायाः जायते। मुक्तेर्क्रमोऽयम्भवति-

1. देवं ज्ञात्वा सर्वपाशाः विनश्यन्ति।

2. अविद्यादीनां क्लेशानां विनष्टे जाते जन्ममरणात्मकस्य चक्रस्य नाशो भवति।

3. विनष्टे देहे केवलो भूत्वा विश्वमैश्वर्यं प्राप्य आप्तकामः जायते।

**क्षरं प्रधानममृताक्षरं हरः क्षरात्मानाविशते देव एकः। तस्याभिध्यानाद्योजनात्तत्त्वभावाद् भूयश्चान्ते विश्वमाया-निवृत्तिः।**

**ज्ञात्वा देवं सर्वपाशहानिः क्षीणैः क्लेशैर्जन्म मृत्युप्रहाणिः।।**
**तस्याभिध्यानात्तृतीयं देहभेदे विश्वैश्वर्यं केवल आप्तकामः।।**

ध्यानस्य स्थानं विधिश्च-ध्यानयोगस्य क्रमिक-फलान्युक्त्वा ध्यानस्य स्थानं विधिश्चोभे वर्णिते। यथा वह्निरिन्धने समाश्रितो भवति तथैव जीवात्मा ब्रह्म च प्रणवजपेन शरीरे ज्ञातुं शक्येते।

**वह्नेर्यथा योनिगतस्य मूर्तिर्न दृश्यते नैव च लिङ्गनाशः।**
**स भूय एवेन्धनयोनिगृह्यस्तद्वोभयं वै प्रणवेन देहे।।**
**स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम्।**
**ध्याननिर्मथनाभ्यां देवं पश्येन्निगूढवत्।।**

सर्वैब्रह्मवादिभिः ब्रह्मणः सर्वव्यापकतायालौंकि कैः दृष्टान्तैर्वर्णनङ्कृतं स्वस्यात्मनि सत्यतपात्मविद्यादिभि-रुपायैस्तस्य प्राप्तिः सुनिश्चिता कृता।।6।।

द्वितीयेऽध्याये ब्रह्माण्डयोगस्य वर्णनं यजुर्वेदस्य पञ्चभिः मन्त्रैर्कृतम्। मन्त्राणामेषां सारांशोऽयमस्ति सूर्य इव मनुष्यमात्रेणापि परमतत्त्वेन सह युक्त्वात्म-कल्याणाय सर्वहिताय च कर्माणि कर्त्तव्यानि। योगस्य ज्ञानं सर्वप्रथमं स्त्रष्ट्रा सवित्रे प्रदत्तमतः सूर्य एव प्रत्यक्षनिदर्शनं भवितुं शक्यते। सूर्यं प्रमाणीकृत्या-ध्यात्मयोगस्य निरूपणमुपनिषदि पद्यरूपे उपलब्धमस्ति, तस्य विवरणमित्थं विद्यते-

1. योगस्य विधिः- यथा तरणकाले शिरग्रीवावक्षनाम-

कान्यङ्गान्यूर्ध्वं क्रियन्ते तथैव तानि त्रीणि त्रिवारमूर्ध्वं कृत्वा शरीरं समं विधाय इन्द्रियाणि च मनसा संयोज्य हृदये संनिवेष्टव्यानि।

2. प्राणान्बलपूर्वकन्निरुध्य शारीरिकचेष्टाश्च निष्क्रियाः कृत्वा क्षीणेषु प्राणेषु नासिकया बहिर्कर्त्तव्याः। अनेन विधिना चञ्चलेन्द्रियाश्वैर्नियन्त्रणरहितम्मनः सावधानतया तथैव वशे कर्त्तव्यं यथा बुद्धिमता सारथिना दुष्टाश्वयुक्तः रथो वशे क्रियते।

प्राणायामस्य स्थानम्- प्राणायामस्य स्थानमग्निश-र्कराबालुरहितं चक्षुपीडाकारकञ्च न भविव्यम्। इदं शब्दजलाशयादिभिः मनोऽनुकूलं समं पवित्रं गुह्यञ्च भवितव्यम्।

योगस्य प्राथमिकपरिणामः- मनस आत्मनि लीने प्राथमिके फलस्वरूपे योगिना नीहारधूमसूर्याग्निवायु-खद्योतविद्युत्स्फटिकचन्द्रमसां विविधानि रूपाणि दृश्यन्ते।।

योगस्य समग्रफलप्राप्तिः- 1. योगस्य समग्रफल-स्वरूपे योगी पृथ्वीजलतेजवाय्वाकाशान् स्वस्य वशे करोति। 2. भौतिकतत्त्वानामुपरि नियन्त्रणे जाते योगिनो देहो योगाग्निना देदीप्यमानो भवति स च रोगवृद्धावस्था-मृत्युरहितो जायते। 3. लघुत्वन्नीरोगताऽलोलुपता वर्णप्रसन्नता स्वरमाधुर्यं सुगन्धः मलमूत्रस्याल्पता-इत्यादीन्यपि लक्षणानि भवन्ति योगिनः। 4. यथा मृदाऽवेष्टितं सुवर्णपिण्डं सम्यक् प्रक्षालनेन देदीप्यमानं भूत्वा राजते तथैव योगी आत्मानं प्रत्यक्षीकृत्य विभ्राजते। स सिद्धो शोकरहितश्च जायते। 5. आत्मतत्त्वस्य प्रकाशेन ब्रह्मतत्त्वं प्रपश्यति। परमात्मतत्त्वमजन्नित्यं सर्वाधिकं विशुद्धमस्ति इति ज्ञात्वा योगी सर्वपाशैर्मुच्यते।

निष्कर्षः- परमात्मा ब्रह्म वाऽस्माकं परमस्वभावो विद्यते। परमात्मनः साक्षात्कार अध्यात्मयोगेन कर्तुं शक्यते। आस्तिकबुद्धिस्वाध्यायजपतपादीनि साधनानि भवन्ति सहायकानि।

सन्दर्भाः 1. श्वेताश्वतरोपनिषदि-5/21, 2. तत्रैव-1/3, 3. तत्रैव-1/4-9, 4. तत्रैव-1/10-11, 5. तत्रैव-1/13-14, 6. तत्रैव-1/15-16, 7. तत्रैव-2/1-5, 8. श्रीमद्भगवद्गीतायां 4/1, 9. '**त्रिरुन्नतं स्थाप्य समं शरीरं हृदीन्द्रियाणि मनसा संनिवेश्य। ब्रह्मोडुपेन प्रतरेत् विद्वान्स्रोतांसि सर्वाणि भयावहानि।। प्राणान्प्रपीड्-येह संयुक्तचेष्टः क्षीणे प्राणे नासिकयोच्छ्वसीत। दुष्टाश्वयुक्तमिव वाहमेनं विद्वान्मनो धारयेताप्रमत्तः।।**' श्वेताश्वतरोपनिषदि 2/8-9, 10 ''**समे शुचौ शर्करावह्निबालुकाविवर्जिते शब्दजालाश्रयादिभिः। मनोऽनुकूले न तु चक्षुपीडने गुहानिवाताश्रयणे प्रयोजयेत्।।**'' तत्रैव-2/10, 11. ''**नीहारधूमार्का-निलान-लानां खद्योत विद्युतस्फटिकराशीनाम्। एतानि रूपाणि पुरःसराणि ब्रह्मण्यभिव्यक्तकराणि योगे।।**''- तत्रैव 2/11, 12 ''**पृथ्व्यप्तेजोऽनिलखे समुत्थिते पञ्चात्मके योगगुणे प्रवृत्ते। न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्।। लघुत्व-मारोग्यमलोलुपत्वं वर्णप्रसादं स्वरसौष्ठवं च। गन्धः शुभो मूत्रपुरीषमल्पं योगप्रवृत्तिं प्रथमां वदन्ति।।**''

**यथैव बिम्बं मृदयोपलिप्तं तेजोमयं भ्राजते तत्सुधौ-तम्। तद्वात्मतत्त्वं प्रसमीक्ष्य देही एकः कृतार्थो भवति वीतशोकः।। यदात्मतत्त्वेन तु ब्रह्मतत्त्वं दीपोपमेनेह युक्तः प्रपश्येत्। अजं ध्रुवं सर्वतत्त्वैर्विशुद्धं ज्ञात्वा देवं मुच्यते सर्वपाशैः। ।** तत्रैव-2/12-15.

वरिष्ठप्रवक्त्री,
से. मु. मा. राजकीये स्नातकोत्तरे कन्यामहाविद्यालये
भीलवाड़ानगरे (राजस्थानम्)

# शब्दार्थसम्बन्धः

❑ ममता गुप्ता

शब्दादर्थबोध इति सार्वजनीनोऽनुभवः। तत्र कैश्चित् श्रुतैः शब्दैर्जायतेऽर्थसम्प्रत्ययः कैश्चित्तु नार्थप्रतीतिः। येनापि शब्देन जायतेऽर्थप्रत्ययस्तेनापि न भवति सर्वेषामर्थानामवबोधः किन्तु कस्यापि विशेषार्थस्यैव जायते तत्र बोधः। हेतुनानेनावगम्यते यदस्ति शब्दार्थयोः कश्चन सम्बन्धो येन तत्तच्छब्देन तत्तदर्थस्यैव बोधो नान्यस्यार्थस्य बोध इति। स च सम्बन्धो नियतपदानां नियतार्थैः सदैव भवति। अतः संकेतसहाय एव शब्दोऽर्थप्रत्यायको न तु अगृहीतसंकेतः शब्दः। संकेतस्तु पदपदार्थयोरितरेतराध्यासरूपः अर्थात् पदपदार्थयोः परस्परान्यधर्मावभासरूपः, स्मृत्यात्मकः अर्थात् स्मृतौ आत्मस्वरूपं यस्य सः स्मर्य्यमाणः योऽयं शब्दः सोऽर्थः, स एवार्थः यश्चार्थः स एव शब्दः अर्थात् शब्दार्थयोरैक्ये, शब्देऽर्थस्याभासः, अर्थे शब्दस्याभासः, अयमेव इतरेतराध्यासरूपः संकेत इति भावः। ज्ञातसंकेतस्यैव शक्तिबोधकत्वबोधनाय स्मृत्यात्मक इति विशेषणं प्रदत्तमस्ति। एवं च संकेतस्तु द्विविधो भवति नैयायिकाभिमतेश्वरेच्छारूपः, पातंजलाभिमततादात्म्यरूपश्चेति।

मंजूषाकारस्य तात्पर्यं शब्दार्थयोः परस्परयोरध्यासो भवति कथयन्तु कः शब्दोऽस्ति? तथा कोऽर्थोऽस्ति? इति वा प्रश्ने उभयोरेवैकोत्तरम्- अयं घटशब्दोऽस्ति, अयं घटशब्दार्थोऽस्तीति। अनेन शब्दार्थयोः अध्यासः सिद्धः। अयमेव संकेतः तथा च अध्यासमूलकः तादात्म्यसम्बन्धोऽस्ति। अयं शक्तेः ज्ञापकोऽस्ति, शक्तिरूपो नहि।

तार्किकपदविशेष्यकार्थविशेष्यकेश्वरीयसंकेत एव शक्तिरित्यस्य खण्डनम्- ईश्वरसंकेत एव शक्तिरिति नैयायिकमतं नोचितं संकेतस्य शक्तिग्राहकत्वेन मुख्यशक्तित्वाभावात्। अयमर्थः एतस्य पदस्य शक्यः, अत्र अस्मिन्नर्थे अस्य पदस्य शक्ति इत्याकारकस्य संकेतस्य शक्त्येक्षया भिन्नत्वरूपेण प्रसिद्धत्वात्। संकेतो यदि शक्तिरूपः स्यात् तदाऽत्र घटकतया शक्तिनिवेशो न स्यात्, स्वस्य स्वघटकत्वाभावात्।

ईश्वरसंकेतसम्बन्धे वैयाकरणमतं किंच ईदृशसंकेतस्य लोके दर्शनेन तादृशेश्वरसंकेतस्याप्यनुमानात् बोधः। अतएव न्यायवाचस्पत्ये ''सामयिकः शब्दादर्थप्रत्ययः'' इति सूत्रस्थे-सर्गादिभुवां महर्षिदेवतानामीश्वरेण साक्षादेव कृतः संकेतस्तद्व्यवहाराच्चास्मदादीनामपि सुग्रहस्तत्संकेत इति अर्थात् सृष्ट्याद्यकाले गृहीतजन्मनां महर्षिदेवतानां भगवता अस्यायं वाचकः अस्मादयं बोद्धव्यः, इति संकेतः साक्षादेव कृतः। अस्य ज्ञानन्तु वृद्धव्यवहारादिना जायते, व्यवहारपारम्पर्यात्तु ईश्वरसंकेतः सुबोध इति भावः।

योगावाचस्पत्येऽप्येवमेवोक्तं- ''सर्वे च शब्दाः सर्वार्थाभिधानसमर्था इति सर्वैरर्थैः सर्वेषां शब्दानां सम्बन्धः, ईश्वरसंकेतस्तु प्रकाशकः। भर्तृहरिरप्याह-''

**नित्याः शब्दार्थसम्बन्धाः समाम्नाता महर्षिभिः।**
**सूत्राणामनुतन्त्राणां भाष्याणां च प्रणेतृभिः।।**

पातंजलभाष्येऽप्युक्तं- पदपदार्थयोः वाच्यवाचकभाव एव सम्बन्धः। एतदवलम्ब्यैव शब्दो वाचकः, अर्थश्च वाच्य इत्युच्यते। तद्ग्राहकं च इतरेतराध्यासमूलकं तादात्म्यम्। तादात्म्यमेव संकेतः। तादात्म्यं च भेदसहिष्णुरभेदः। तद्भिन्नत्वेऽपि तदभेदेन प्रतीयमानत्वमेव तादात्म्यम्। एतदनुसारम् अर्थः शब्दात् भिन्नाभिन्नो भवति। योऽर्थो येन शब्देन भिन्नाभिन्नः स एव बोध्यते तेन शब्देन। सर्वेषामर्थानां सर्वैः शब्दैः सह तादात्म्यं नास्तीति न जायते बोधः सर्वैः शब्दैः सर्वषामर्थानाम्।

शब्दार्थयोः यत्तादात्म्यं तस्य मूलमस्ति इतरेताराध्यासः। स चेत्थं लोके प्रोच्यते-पदं श्रुतम् अथार्थं शृणु। अत्रार्थे शब्दधर्मः श्रावणप्रत्यक्षयोग्यत्वं व्यक्तीकृतमेवास्ते। एवमेम 'रामेतिद्व्यक्षरं नाम मानभंगः पिनाकिनः' इत्यत्र शब्देऽपि अर्थधर्मव्यवहारो दृश्यते। एवं चोभयोरध्यासः स्फुटतरः। अध्यासस्य भेदाभेदमूल-

कत्वादेव अग्निशब्दोच्चारणे कृते न मुखदाहापत्तिः। न वा गुड इत्युक्ते मुखे माधुर्यानुभूतिः। अयं च इतरेतराध्या-सोऽनादिव्यवहारकृदीश्वरकृत् आधुनिकश्चापि गृह्यते। महाकविना कालिदासेन कृतोऽस्यां दिशि संकेतः-

वागर्थाविव सम्पृक्ताविति स्वोक्त्या।

तदुक्तं भूषणकारेण

**इन्द्रियाणां स्वविषयेष्वनादिर्योग्यता यथा।**
**अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा।**

शब्दानामर्थैः सह वर्ततेऽनादिकालिक एव तादात्म्यमूलको वाच्यवाचकभावसम्बन्ध इति तत्तात्पर्यम्।

नागेशसिद्धान्तः- सर्वे सर्वार्थवाचका इति भाष्यात् सर्वैरर्थैः, सर्वेषां सम्बन्धः स्थित एव, ईश्वरसंकेतस्तु प्रकाशकः। शब्दार्थसम्बन्धस्य नित्यत्वात्। तादात्म्यस्य सम्बन्धत्वसमर्थनम्, अन्यत्फलंच- तादात्म्यसम्बन्धस्य निरूपकत्वेन वक्तुमिष्टः अर्थः शक्य उच्यते, आश्रयत्वेन विवक्षितः शब्दः शक्त इत्युच्यते।

शब्दार्थयोः तादात्म्यस्वीकारादेव श्लोकमशृणोत् अर्थं वदतीत्यादिव्यवहारः संगच्छते। यतोहि अर्थे श्रावणप्रत्यक्षत्वं सदैव सम्भवं वर्तते, तदा एतद्व्यवहारार्थं तयोः तादात्म्यमावश्यकम्। एवमेव अर्थं वदतीत्यत्रापि वदनं नाम उच्चारणम्, उच्चारणकर्म्मत्वं च शब्दस्यैव नार्थस्य।

एतत्सम्बन्धातिरिक्तो व्यंजनानामकः सम्बन्धोऽपि वाच्यलक्ष्यातिरिक्तस्य व्यंग्यार्थस्य बुबोधयिषया स्वीकृतो वर्तते। सा चेयं व्यंजना मुख्यार्थबाधग्रहनिरपेक्षबोध-जनिका मुख्यार्थसम्बद्धासम्बद्धसाधारणप्रसिद्धार्थ-विषयिका शब्द-तदर्थ-पदपदैकदेशवर्णरचनाचेष्टादिषु वर्तमाना अभिधा-लक्षणानुमानादिभिर्यत्नसहस्रेणाप्यन्य-थयितुमशक्या सर्वैरुपास्यैवेति नात्रावसरो मनागपि संशयस्य।

**शोधकर्त्री**
संस्कृतविभागः, डॉ. भीमराव-अम्बेडकर-राजकीय-स्नातकोत्तर-महाविद्यालयः, श्रीगंगानगरम् (राज.)


# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.- 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम.................................. ...........पुत्र/पुत्री श्री............................भवन संख्या...........**
**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस....................................**
**तहसील................................जिला........................ राज्य.....................................**
**देश...................पिन.......................................दूरभाष.......................................**
**मोबाईल नं...........................ईमेल..........................................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**
**भारती संस्कृत मास पत्रिका**
**बी-15, भारती भवन, न्यू कॉलोनी, जयपुर-302001 (राज.) दूरभाष-2379014**
**ई-मेल - sanskritbharti09@gmail.com**

# ऋतुविहारे ऋतुवर्णनम्

❑ आचार्य दीपक शर्मा

फतेहपुर-शेखावाटीवास्तव्येन वैद्यशंकर लाल शर्मणा 2016 तमे वैक्रमाब्दे 'ऋतुविहार:' इत्याख्यं खण्डकाव्यं विरचितम्। दशाधिकशतद्वयपद्यात्मके-ऽस्मिन् खण्डकाव्ये वसन्तादीनां षण्णामृतूनामतीव मनोहारि प्रसादमाधुर्यगुणोपेतम् च वर्णनं कृतमस्ति। वैद्यमहोदयस्येयमाद्या कृतिरस्ति। स्वनामधन्यो भट्टमथुरानाथशास्त्री काव्यस्यास्य भूमिकां व्यलिखत्। ऋतुवर्णनेन सार्द्धं वैद्यमहोदयेनात्र सरलं ग्राम्यजीवनं चित्रितमस्ति। तत्रापि विशेषत: कृषिकर्मरतानां जनानां विविधा: कार्यकलापा: वर्णिता: सन्ति। ऋतुवर्णनावसरे कविवरोऽयं क्वचिद् वसन्ते नवपत्रपुष्पसंभारभरितान् वृक्षलतादीन् वर्णयति, क्वचिद् ग्रीष्मे परित: उड्डीयमानाभि: बालुकाभि: सार्द्धं तीव्रं झंझावातं वर्णयति, क्वचिद् वर्षासु मेघगर्जनं श्रुत्वा केकारवं कुर्वत: नृत्यपरायणान् मयूरान् चित्रयति, क्वचिद् रात्रौ दीपे पतत: शलभान् वर्णयति, क्वचिद् दीपमालिकायां तैलपूर्णै: दीपै: देदीप्यमानानि गृहाणि वर्णयति, क्वचिच्च शैत्याधिक्यात् दिवानिशं कम्पमानान् निर्धनान् वर्णयति। तदिदं सर्वमस्मिन् निबन्धे दृष्टान्तपुरस्सरं प्रस्तुतं करिष्यते।)

काव्येषु वसन्तादिषड्तूनामुद्दीपनविभावत्वेन वर्णनस्य सुदीर्घपरम्परा विद्यते। आदिकाव्ये रामायणे विशदमृतवर्णनमुपलभ्यते। महाकवि: कालिदास: ऋतुसंहारे षट्सु सर्गेषु ग्रीष्मर्तोरारभ्य वसन्तपर्यन्तानां षण्णामृतूनां हृदयहारि वर्णनं कुरुते। तामेव परम्परामनुसरन् वैद्यशंकरलालशर्ममहोदय: ऋतुविहारे वसन्तादिषड्तूनां सरसं स्वाभाविकं प्रसादमाधुर्यगुणोपेतं च वर्णनं प्रस्तौति। अन्यच्च कविवरोऽत्र ऋतुवर्णनव्याजेन ग्रामेषु प्रसृतां भारतीयां संस्कृतिं विशदं चित्रयति।

तत्रादौ वसन्तर्तुं रचनाकार: कथयति - यत् समागते वसन्ते प्रत्येकं मानवस्य चित्तं प्रफुल्लितं भवति अत एवायमृतु: ऋतुराज: इति कथ्यते। तदुक्तम्-

**दिनमणौ घटमीनगते सति मधुरयम् समुदेति धरातलम्।**
**जनमनांसि समुल्लसितान्यत: कविवरै: ऋतुराज इतीर्यते।।7।।**

कवि: कथयति यदस्मिन् ऋतौ शिशिरकालवत् शीताधिक्यं न भवति। अधुना पुष्पाणां सौरभेण पृथिवीमण्डलमलंकृतं जायते। लोकानां मनांसि प्रसन्नानि जायन्ते। तदुक्तम्-

**शिशिरकालजशीतविशेषतां परिहरन्नृतुराजमधु:प्रिय:।**
**अवनिमण्डलमण्डितसौरभो जयतु मानवमानसमानद:।।8।।**

अधुना वनस्पतयो नवै: पुष्पैश्चालंकृता: भवति। परित: पिकानां रव: भ्रमराणामुन्मदो ध्वनिश्च श्रुतिपथमुपैति। तदुक्तम्-

**तरुषु कोमलपल्लवशालिषु परभृतो मधुपाश्च रवं मधौ।**
**विदधति श्रवणप्रियमुन्मदा ऋतुवरे भुवने समुपस्थिते।।10।।**

किमधिकमधुना शमी-करीरसदृशा: मरुतरवोऽपि नवपल्लवपुष्पसंभारभाजो भवन्ति। अधुना लोका: पीतवस्त्राणि परिदधति क्षेत्रेष्वपि सर्षपादिकं पीताभां दधाति दक्षिणां मलयजो वात: वाति। सर्वमिदं दृष्ट्वा कविरुत्प्रेक्षते यदधुना वसन्त: स्वयं पीतवर्णवेशं धृत्वा स्वसुहृदा मलयजेन दक्षिणानिलेन सह भूमौ विहरति। तदुक्तम्-

**धृतसुपीततनु: सुरभिमदूर्मलयजेन समं भ्रमति क्षितौ।**
**ऋतुमिमं च निरीक्ष्य शिवादृते मनसि को नु! विभर्ति न मन्मथम्।।5।।**

अग्रे वसन्तं वर्णयन् कवि: कथयति यदधुना शिशिरकालवत् हिमपातो न भवति, नाकाशं हिमकणैरावृतं भवति न चापि आकाशं मेघाच्छन्नं भवति। एवमेव ग्रीष्मकालवद् अत्युष्णा: पश्चिमवायवो चलन्ति अत एवाधुना सर्वा: दिश: निर्मला: भान्ति। तदुक्तम्-

**न च हिमन्न तुषारचयो मधौ न हि पयोदकुलैर्वियदावृतम्।**
**न च चलन्ति हि पश्चिमवायवो गतमलाः ककुभो विलसन्त्यतः।।16।।**

वसन्तर्तोरनन्तरं ग्रीष्मर्तुं वर्णयन् कविः कथयति यद् यदा भगवान् भास्करः मेषराशिं वृषराशिं चोपैति, तदा भूमौ ग्रीष्मर्तु रायाति। अधुना सूर्यस्य तीक्ष्णेन तापेन पृथिव्याः सौम्यगुणंः प्रतिदिनं क्षयमेति। पृथिव्यां नदीषु तडागेषु पल्वलेषु निर्झरेषु च जलं शुष्यति। अधुना परितः प्रसरणशीलाः धूलिकणाः तीव्रवात्याभिः सह उड्डीयन्ते। पयांसि पातुं पशवः इतस्ततो धावन्ति। तदुक्तम्–

**अत्युष्णवाताःप्रचलन्ति नित्यं म्लानिप्रदा धूलिकणैः समेताः।**
**पयांसि पातुं पाशवो भ्रमन्ति तापेन शुष्कास्यगला इदानीम्।।2/3।।**

ग्रीष्मे मध्याह्ने सूर्यस्य तीव्रं तापं वीक्ष्य कविरुत्प्रेक्षते यदधुना कुपितो भानुः अग्निं वर्षति। तदुक्तम्–

**मध्याह्नकाले दिवसेशतेजो भृशोष्णतीक्ष्णं भवतीह नूनम्।**
**विज्ञायते प्राणिभिरग्निवृष्टिं करोति भानुः कुपितो निदाघे।।2/4।।**

अग्रे कविः पुनरुत्प्रेक्षते यदधुना खगाः खगत्वं परिमुंचन्ति अर्थात् खगानां खे गमनात् खगाः इति संज्ञा सार्थकतामावहति परं ग्रीष्मे तापाधिक्यात् ते खे गमनात् विरमन्ति। एवं च तेषां खगाः इति संज्ञा निरर्थकतां प्राप्नोति। तदुक्तम्–

**खगाः खगत्वं परिमुच्य वृक्ष शाखाश्रयत्वं च सुतप्तदेहाः।**
**अन्विष्य शीतं निलयं श्वसन्तस्त्यजन्ति किंचिद्विरश्मितापम्।।2/5।।**

अधुना तीव्रतापवारणाय पंकाविलस्वल्पजलेषु गर्तेषु क्वचित् श्वानः क्वचित् महिष्यः क्वचन कोलयूथं च पार्श्वपरिवर्तनानि विदधति। निदाघे पर्वतेषु लतावृक्षादिं सर्वं जलाभावात् शुष्यति केवलं कृष्णाः प्रस्तरखण्डा एव दृष्टिपथमुपयान्ति। तान् दृष्ट्वा कविरुत्प्रेक्षते यत् सूर्यस्य तापाधिक्यात् पर्वताः कृष्णत्वमुपगताः। अनेन एतदपि सूच्यते यत् तापाधिक्यात् अचेतनाः पर्वताः अपि कृष्णत्वमु पयान्ति। तदुक्तम्–

**शुष्केषु पर्णेषु लताद्रुमाणां ग्रावावशेषाः गिरयस्तपन्ति।**
**अचेतना अप्यरुणांशुतप्ता कार्ष्ण्यं प्रपन्ना इति तर्कयामि।।2/7।।**

कविवरोऽयं मूलतः ग्रामवासी वर्तते, अतः तदीये काव्ये ग्राम्यजीवनस्य दर्शनं प्रतिपदं भवति। ग्रीष्मकाले प्रायः सायं समये परितः प्रसरद्भिः धूलिकणैः सह तीव्राः वात्याः चलन्ति। ताभिश्च सर्वत्र धूलिकणाः व्याप्नुवन्ति, भगवान् भास्करः आकाशश्चापि आच्छादितौ भवतः। तदुक्तम्–

**सायं कदाचिन्नभसि प्रचण्डो वायुश्चलेद्वालुचयैश्चलद्भिः।**
**उड्डीयमानास्त्वरितं जवेन स्तृण्वन्ति भानुं गगनं च वृद्धाः।।12/13।।**

न केवलं दिवसेऽपितु रात्रावपि प्रायः उष्णवायवश्चलन्ति, सर्वत्र रजांसि प्रसरन्ति। चन्द्रतारागगनादिकं रजोभिरावृतं भवति। वर्णनमिदं सरलं ग्राम्यजीवनं साक्षात् चित्रयति। तदुक्तम्–

**क्षपास्वपि ग्रीष्मभवासु शैत्यं न प्राप्यते ह्युष्णसमीरणेन।**
**शशी, ग्रहाः द्योरपि नातिकान्तं रजश्चयेनात्पतितेन चोर्ध्वम्।।2/21।।**

ग्रीष्मे मध्याह्ने मनुष्याः पशवश्चः वटादिवृक्षच्छाया-माश्रयन्ति। तान् दृष्ट्वा कविः यैः वटादिवृक्षाः भुवि रोपितास्तान् प्रशंसति। तदुक्तम्–

**वटादिवृक्षानिह ये वपन्ति ते पुण्यभाजो विपुला धरायाम्।**
**पुलानि छायां च निषेव्य तेषां सुखं लभन्ते पशवो नराश्च।।2/33।।**

एवं ग्रीष्मर्तुं वर्णयित्वा प्रावृषमृतुं वर्णयन् कविः कथयति यद् यदा भगवान् सूर्यः मिथुनराशिं कर्कराशिं च प्राप्नोति तदा भुवि प्रावृड् आयाति। अत्र कविना प्रसंगात् ऋतुविभाजनस्य द्वैविध्यं वर्णितम्। तदनुसारं गंगायाः दक्षिणदिग्भागे यत्र वर्षाधिक्यं भवति। तत्र वर्षर्तोः प्राक् प्रावृड्तुः आयाति। एवमेव गंगायाः उत्तरभागे यत्र शैत्याधिक्यं भवति तत्र शीतकालिकौ हेमन्तशिशिरौ ऋतू मन्येते। अग्रे प्रावृड्तुं वर्णयन् कविः कथयति यत् प्रावृषि आगतायां मेघाच्छन्नं गगनं दृष्ट्वा सर्वे जनाः हृदि मोदमानाः भगवन्तं स्मरन्ति। तदुक्तम्–

**प्रावृट्काले प्रावृतं मेघवृन्दैर्दृष्ट्वाकाशं ग्रीष्मसन्तप्तदेहा।**
**सर्वे जीवाः मोदमानाः स्वचिते विश्वक्सेनं दीनबन्धुं स्मरन्ति।। 3/2।।**

ग्रीष्मकालानन्तरं यदा भुवि प्रथमं वृष्टिर्भवति। तदा भूमितः वाष्पेण सह विशिष्टो गन्धः निस्सरति। विद्युतां

चाकचिक्येन मेघगर्जनेन च साकं यदा भुवि जलबिन्दवो निपतन्ति तदा ते मौक्तिकवद् भान्ति। तेन जनानां मनः प्रसादमुपैति । मेघगर्जनं श्रुत्वा मयूराः नृत्यन्ति केकारवं च कुर्वन्ति। तदुक्तम्-

**जलधरस्तनितं गगने प्रियं खलु निशम्य मयूरगणो मुदा।**
**श्रवणहर्षकरं तनुते ध्वनिम् नयनमोदकरं नटनन्तथा।।3/8।।**

अस्मिन् काले वर्षाः सामान्याः भवन्ति अतस्तडागादिकं शनैः शनैः भरन्ति। येषु तडागेषु जलं संगृहीतं भवति तत्र मण्डूकाः "टरटर इति ध्वनिना जनान् रंजयन्ति।" इदुक्तम्-

**नदसरोह्रदपल्वलनिम्नगाः जलचयैः क्रमशः परिपूरिताः।**
**टरटरध्वनिमेषुच दर्दुरा विदधति प्रियमत्र समन्ततः।। 13/19।।**

यदा कदाचिद् रात्रौ पश्चिमवायुकर्षितैः विशालकायैः श्यामवर्णैश्च मेघैः धरायां अतिगहनं तमः प्रसरति परं मध्ये मध्ये विद्युतां चाकचिक्येन तमो नश्यति। तदुक्तम्-

**वरुणदिग्भवमारुतकर्षितैः पृथुलमेचकमेघगणैर्वृतम्।**
**वियदतस्तमसि प्रसृते क्षितौ निशि चकास्ति मुहुश्चपलाद्युतिः।।3/10।।**

अधुना वर्षायोगात् भूम्यां नानाप्रकारकं घासम् उदेति, इन्द्रगोपाश्च (रक्तवर्णाः लघुकायाः कीटविशेषाः) इतस्ततो विचरन्ति। अल्पवयसो बालकाः तान् हस्ते निधाय प्रसन्नाः भवन्ति। तदुक्तम्।

**शुष्का मही प्रावृषि वृष्टियोगात् प्रत्यग्रशष्पैर्मृदुभिश्च युक्ता।**
**तथेन्द्रगोपाः परितश्चरन्ति प्रगृह्य पाणौ शिशवः प्रसन्नाः।।12।।**

अधुना बालकाः आर्द्रमृत्तिकाभिः आलवालं विधाय जलं संगृह्णन्ति। ततश्च नालिकाभिः जलम् इतस्तनो नयन्ति प्रसन्नतां चानुभवन्ति। अधुना सीतासु समुत्पन्नस्य वज्रान्नादिकस्य नानाविधं पत्रनिकरं दृष्ट्वा लोकानां मनसि जगदीशस्य सत्ता दृढीभवति। तदुक्तम्-

**सीतासु वज्रान्नमकुष्ठमुद्गमाषादिधान्योद्भवपत्ररूपम्।**
**विभिन्नमालोक्य मनःसु पुंसामुदेति सत्ता जगदीश्वरस्य।।1 3/17।।**

ततश्च वर्षर्तुं वर्णयन् कविवरः कथयति यत् यदा भगवान् सूर्यः सिहराशिं कन्याराशिं चोपैति। तदा वर्षर्तुरागच्छति। अधुना श्यामैः स्थलैश्च मेघैः गगनमावृतं भवति। दिवसे सूर्यः रात्रौ चन्द्रतारकादयः मेघेषु लीयन्ते। तदुक्तम्-

**रविर्यदारोहति सिंहकन्ये वृष्टिस्तदालंकुरुते धरित्रीम्।**
**घनैः पयातिदैरवरुद्धभानु-विधुग्रहं विष्णुपदं भवेद्धि।। 4/1।।**

अग्रे कविः कथयति यत् प्रावृषि स्वल्पवर्षाभिः तडागेषु शनैः शनैः स्वल्पं जलं संगृहीतम् अभूत् परमधुना तीव्रवर्षाभिः तडागादिकं जलंपूरितमभूत्। अधुना स्थलं गर्तं च समानं प्रतीयेते। प्रावृषि उप्तं धान्यादिकं स्वतः उदितं घासादिकं च अधुना वृद्धिं गतं तेन च हरितवर्णैः धान्यैः घासैश्च भूमिः धृतहरितांशुकेव प्रतिभाति। तदुक्तम्-

**वृक्षलतातृणजातिसमूहै र्भाति मही हरिदंशुकयुक्ता।**
**वर्णहरित्पृथिवीसुषमाञ्च वीक्ष्य मनःसु नरा मुदिताश्च।।4/6।।**

अधुना प्रातःकाले आकाशात् घासादिपत्रेषु पतिताः जलकणाः मौक्तिकवत् आभान्ति। रात्रौ शलभाः दीपेषु पतन्ति आत्मानं दहन्ति च, तेन लोके दीपपतंगसख्यम् प्रसिद्धिं गतम्। तदुक्तम्-

**दीपसमीपगताः क्षणदासु प्रेमयुताः शतशः शलभास्तु।**
**आत्मतनूः प्रदहन्ति जगत्याम् पश्यत दीपपतंगसुहृद्यम्।।4/8।।**

वर्षासु सूर्यः यदा अस्तमेति तदा जलदैः आकाशं अपूर्वां रक्ताभां धारयति। वर्षासु आकाशे नानावर्णमैन्द्रं धनुः दृष्ट्वा बालकाः प्रसीदन्ति। तदुक्तम्-

**अरुणपिंगहरिच्छविभिर्युतम् धनुरिवेन्द्रधनुर्वियति स्थितम्।**
**शिशुगणैः प्रतिलोक्य मुदान्वितैः निजकरांगुलयोऽभिमुखीकृताः।।4/25।।**

वर्षासु पर्वतशिखरेषु मेघाः प्रसरन्ति, तान् दृष्ट्वा कविः उत्प्रेक्षते यत् जलभारेण श्रममुपगता मेघा अत्र विश्राम्यन्ति। तदुक्तम्-

**अथ जलानि विमुच्य पयोमुचःशिखरिसानुषु धूमचये स्थिताः।**
**सलिलभारपरिश्रमिताः क्षणं ह्यपनयन्ति तनुश्रममेष्विव।।4/27।।**

ततश्च शरदृतुं वर्णयन् कविः कथयति यत् यदा भगवान सूर्यः तुलाराशिं वृश्चिकराशिं चोपैति तदा भुवि शरदृतुरायाति। शरदृतौ विपण्यां विक्रयार्थं नूतनं धान्यमायाति। अधुना मार्गाः पंकर हताः जायन्ते। अतः

गमनागमनं सुकरं भवति। तदुक्तम्-

**तरणिरेति यदा तुलवृश्चिकौ धरणिरेति शरन्नवसम्पदः।**
**विपणिरेति नवम्वरधान्यकम् सरणिरेति मनुष्यगतागतम्।।5/1।।**

शरदृतौ वर्षाकलावद् नदीषु अधिकं जलं नास्ति। गगनमपि कृष्णमेघैराच्छन्नं न भवति। भूमिरपि सितकाशसमन्विता भवति। तदुक्तम्-

**नहि नदीष्वधुना प्रचुरं जलम् न च नभो ह्यसिताम्बुदसंकुलम्।**
**अपि च भूः सितकाशसमन्विता विगतवृष्टिरियं शरदागता।। 5/2।।**

अस्मिन् ऋतौ वज्रान्नमुद्गादिधान्यजातम् परिपक्वतामेति। तेन कृषकाणां मनः तथैव प्रसीदति यथा कार्ये सफलतामधिगम्य सामान्यो जनः प्रसीदति। शरदृतौ मरुप्रदेशे अमृतकल्पानि ''मतीरा'' इत्यभिधानानि फलानि पर्याप्तमात्रायां मिलन्ति। एवमेव सुगन्धपूर्ण-पीताकृतियुतं चिर्भटिकाफलम् जनरंजनाय जायते। मरुप्रदेशे यत्र कूपजलं लवणात्मकं भवति तत्रापि चिर्भटिकामतीरादिफलानां माधुर्यं दृष्ट्वा सर्वोऽपि जनः परमात्मनो विभुत्वं साश्चर्यं पश्यति। तदुक्तम्-

**मरुषु जलं लवणान्वितम् गलविलं पिबतो दहति क्षणम्।**
**मरुषु तत्र पुलादिषु मिष्टतामनुभवन् विभुशक्तिरहोऽतुला।।5/7।।**

शरदि तडागा निर्मलेन जलेन विकसितैः कमलैः हंससमूहेन च सुशोभन्ते। विजयसारसप्तपर्णरक्तक-काशदिपुष्पैः भूमिः सुशोभिता भवति। अधुना गगने कृष्णमेघाः न दृश्यन्ते च चापि विद्युतां चाकचिक्यं दृश्यते। निर्मले आकाशे रम्यकान्तियुतश्चन्द्रमाः तारकाश्च सुशोभन्ते। तदुक्तम्-

**विततचन्द्रकरद्युतयोऽनिशं विनिपतन्ति यदा सिकताचये।**
**विमलविष्णुपदे शशितारकाः समवभान्ति मनोहरकान्तयः।।5/10।।**

अधुना रात्रौ पूर्णचन्द्रमसः चन्द्रिका यदा बालुकाचये निपतति तदा बालुकाचयः सितरजतमिव प्रतिभाति। तदुक्तम्-

**विततचन्द्रकरद्युतयोऽनिशं विनिपतन्ति यदा सिकताचये।**
**सुषमया प्रतिभाति तदा ह्यसौ विशदरौप्यनिभश्च मनोरमः।।5/11।।**

रात्रौ यदा चन्द्रमसः चन्द्रिका जलेन पूर्णेषु तडागेषु नदीषु च पतति तदा ते दुग्धभृतानि प्रतीयन्ते। अधुना चन्द्रमसः चन्द्रिकायुताः रात्र्यः सर्वान् जनान् प्रसादयन्ति। तदुक्तम्-

**प्रियशशांकयुता विशदप्रभा मृदुसुगन्धिसमीरसुखप्रदाः।**
**धवलिताखिलवस्तुशरन्निशा दधति कस्य मुदन्न महीतले।।5/18।।**

शरदृतोर्वर्णनान्तरं हेमन्तं वर्णयन् कविः कथयति यदा भगवान् सूर्यः धनुराशिं मकरराशिं चोपेति तदा भुवि हेमन्तर्तुरायाति। अस्मिन् काले दिनानि लघूनि रात्रयश्च दीर्घाः भवन्ति। तदुक्तम्-

**सूर्ये धनुर्ग्रा हगतेऽथ शीतस्तुषारकालः समुपैति भूमिम्।**
**लघून्यहानि क्षणदाश्च दीर्घा यानेन भार्नेर्दिशि दक्षिणस्याम्।।6/1।।**

अधुना चन्द्रमसः शीतस्निग्धतादिगुणाः वृद्धिं यान्ति सूर्यस्य च उष्णतादिगुणाः क्षोयं यान्ति। एवं च यदा रवि-चन्द्रमसावपि विधेः विधानम् अनुसरतः तदा सामान्यजनानां का कथा। तदुक्तम्-

**हिमे हिमांशुः परिवृद्धिमाप्तो मार्गस्वभावादरुणश्च हीनः।**
**नियन्त्रिताविन्दुरवी विधाने धात्राऽन्यजीवाः कुत एव लोके।।16/2।।**

अस्मिन्काले धनिनो जनाः शीतं विनेतुं और्णानि वस्त्राणि दधति परं निर्धनाः जनाः तृणपत्रकाष्ठादिकं संदाह्य शीतादात्मानं रक्षन्ति। तदुक्तम्-

**एते कुतश्चित् तृणपत्रकाष्ठान्याहृत्य सन्दाह्य कृशानुना च।**
**शीतंशरीरस्य निवारयन्ते समीक्ष्य तांश्चेतसि भूरि दुःखम्।16/7।।**

अधुना चन्द्रमाः पूर्णतया वृद्धिं कुरुते। अधुना यदा कदाचित् शीतो वायुः वहति, वृष्ट्या सह करकनिपातो भवति शीतभयात् लोकाः गृहाद् बहिर्न यान्ति। तदुक्तम्-

**हिमानिलेनोपलकैश्च वृष्ट्या शीतप्रकर्षो दिवसेऽपि तस्मात्।**
**सुखैषिभिः पौरजनैः स्वगेहं न मुच्यते शीतभयादिदानीम्।।16/10।।**

एवमत्र ऋतुविहारे वसन्तादिषड्तूनामतीव मनोहारि प्रसादमाधुर्यगुणोपेतं वर्णनं विद्यते।

**शोधच्छात्रः**
**साहित्यविभागः, जरारासंविवि. जयपुरम्।**

नारी-स्तम्भः

# नमामि देवि नर्मदे

❑ डॉ. राजेश्वरीभट्ट

वर्षं वर्षं वर्द्धमानं पर्यावरणप्रदूषणं विश्वे महच्चिन्तनीयं जातम्। वैदिककालादेव नद्यो मातृवत् वृक्षाः पितृवत् पर्वताश्च देववत् पूज्यन्ते। प्रातरुत्थाय सप्तसिन्धूनां स्मरणं पुण्यकारकं मोक्षदायकञ्च भवति। कथितञ्च-

गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु। ( पूजा पद्धति )।।

किन्तु अस्मिन् तकनीकीयुगे भौतिकतायां लिप्तो मानवः आत्मनैव आत्मनो विनाशाय उद्यतो वर्तते। स्वार्थस्य पूर्तिहेतवे स प्रकृत्या सह अतिचाराय प्रवृत्तो जातः, येन प्रकृत्याः सन्तुलनंदोलायमानं दृश्यते, यत् मानवस्य विनाशाय उक्तमस्ति। पर्यावरण-प्रदूषणस्य विभीषिकाम् अवरोद्धुं प्रकृतेः संरक्षणं प्रति जनजागरणं कर्त्तुं विश्वस्मिन् विश्वे 5 जून इति दिवसो 'विश्वपर्यावरण दिवस' इति अभिनन्द्यते। अस्माकं राष्ट्रेऽपि नदीनां वृक्षाणां वनानाञ्च संरक्षणाय अनेकाः संस्थाः संलग्नाः सन्ति। अस्मिन् क्रमे 'मध्यप्रदेशे' पवित्राया नर्मदानद्याः संशुद्ध्यै संरक्षणाय च मुख्यमंत्रिणा 'शिवराजसिंहचौहान' महोदयेन अपारजन-सहयोगेनायोजिता 'नमामि देविनर्मदे' सेवायात्रा जनमानसं प्रेरयन्ती प्रशंसनीया यात्राऽभवत्।

नर्मदानदी भारतवर्षस्य मध्ये गुजरातप्रदेशे च प्रवहन्ती राष्ट्रस्य तृतीया महद्विशाला नदी वर्तते। अस्योद्गमो 'महाकालपर्वतस्य अमरकंटकाद-भवत्' अस्याः तटे गुरुकृपाश्रम, भीमकोली, शुक्रतीर्थादयो बहवः पवित्राश्रमाः सन्ति। यत्र दर्शनार्थिनो अनवरतरूपेण गमनागमनं कुर्वन्ति। दिव्यमहिम्ना नर्मदा मध्यप्रदेशस्य जीवनरेखारूपेण सम्मान्यते। 'स्कन्दपुराणे' रेवाखण्डे भगवता वेदव्यासेन नर्मदानद्याः महिमा विस्तरेण वर्णितः। व्यासस्य वचनैर्ज्ञायते यत् नर्मदा पापनाशिनी, मोक्षदायिनी, शान्तिविधायिनी दिव्या नदी वर्तते।

कथितञ्च -

सबिन्दुसिन्धुसुस्खलत्तरङ्गभङ्गरञ्जिलम्।<br>
द्विषत्सु पापजातजातकारिवारिसंयुत्तम्।।<br>
कृतान्तदूतकालभूतभीतिहारि नर्मदे।<br>
त्वदीय पादपङ्कजं नमामि देवि नर्मदे।। नर्मदाष्टकम्

मत्स्यपुराणेन ज्ञायते यत् यमुनाया जलं सप्तदिनेषु सरस्वत्या जलं त्रिदिवसेषु गंगाजलम् एकस्मिन् दिवसे तथा नर्मदाया जलं तत्क्षणमेव मानवं तारयति। नर्मदानद्या उत्पत्तिविषये अनेकाः कथा उपलभ्यन्ते। श्रूयते यत् कदाचित्तप आरूढस्य भगवतः शंकरस्य शरीरात् पतितेन स्वेदबिन्दुना दिव्यसौन्दर्यमयी एका कन्या प्रादुर्भूता। तस्याः सौन्दर्यण हर्षितौ उमाशंकरौ तां नर्मदा अर्थात् सुखदायिनी इति नाम्ना विभूषितवन्तौ। अन्यच्च - एकस्मिन् 'मेखलपर्वत' भगवता शिवेन नर्मदानाम्नी द्वादशवर्षीया कन्या प्रकटीकृता। 'काशीप्रदेशे' पञ्चकोशीक्षेत्रे इयं कन्या 10000 वर्षाणि यावत् घोरं तपोऽनुष्ठितवती। महत्तपसा तुष्टं शिवं सा दुर्लभान्यन्यानि च कानिचिद् वराणि अयाचत अकथयच्च हे भगवन् प्रलय-कालेऽपि मम विनाशो न भवेत्। मम प्रत्येकं पाषाणखण्डो नर्मदेश्वरनाम्ना प्राणिप्रतिष्ठां विनाऽपि

**पूजितो भवेत्। मम तटे पार्वत्या देव्या सह सर्वेषां देवानां वासो भवेत् भगवतः शिवतः दिव्यवरान्प्राप्य नर्मदा लोके दिव्याऽनन्या च नदी जाता। दिव्यरूप-गुणसम्पन्नाया नर्मदायाः सम्प्रति दुर्गतिगतेन विकृतेनरूपेण विक्षुब्धो मध्यप्रदेशस्य मुख्यमंत्रि-महोदयो नर्मदाया संरक्षणाय कृतसंकल्पो जातः। एकत्कृते मुख्यमंत्रिणा ''नमामि देवि नर्मदे'' नाम्न्या भव्ययात्राया माध्यमेन जनजागरणं कृतम् 11 दिसम्बर 2016 दिवसे 'अमरकण्टकात्' प्रयाता इयं यात्रा 148 दिवसेषु 3300 'किलोमीटर' परिमितं मार्गमतिक्रम्य 25 लक्षसंख्यकैः सहयोगिभिः सह 15 मई 2017 दिने दिवसे आत्मनो गन्तव्यं प्राप्तवती। नर्मदाया संरक्षणाय मुख्यमन्त्रिणा विहितोऽयं भगीरथप्रयासः स्तुत्योऽनुकरणीश्च वर्तते।**

## हिन्दी अनुवाद

प्रतिवर्ष बढ़ता हुआ प्रदूषण विश्व के लिए महान् चिन्ताजनक हो रहा है। वैदिक काल से ही नदियाँ माता की भाँति, वृक्ष पिता की भाँति एव पर्वत देवताओं के रूप में पूजित हैं। प्रातः काल उठकर सप्तसिन्धुओं का स्मरण पुण्यकारक एवं मोक्षदायक माना गया है। कहा भी गया है-

हे गंगा यमुना गोदावरी एवं सरस्वती तथा पूज्य नर्मदा सिन्धु एवं कावरी नदियों आप इस जल में निवास करें।

किन्तु इस तकनीकी युग में 'भौतिकता में' लिप्त मानव अपने आप ही अपने विनाश के लिए उद्यत दिखाई दे रहा है। अपने स्वार्थसिद्धि के लिए वह प्रकृति के साथ खिलवाड़ कर रहा है जिससे प्रकृति का सन्तुलन डगमगा रहा है। जो मानव विनाश का कारण है। पर्यावरणप्रदूषण की विभीषिका को रोकने के लिए तथा प्राकृतिक सम्पदा की सुरक्षा के प्रति जनजागरण करने के लिए विश्व में अनेक प्रयास किए जा रहे हैं। तथा 5 जून को प्रतिवर्ष 'विश्वपर्यावरण दिवस' के रूप में मनाया जाता है। हमारे देश में भी नदियों, वृक्षों एव वनों के संरक्षण के लिए अनेक संस्थाएँ संलग्न हैं इसक्रम में मध्यप्रदेश में पवित्र नर्मदानदी की संशुद्धि एवं संरक्षण के लिए मुख्यमंत्री शिवराज सिंह चौहान के द्वारा अपार जन सहयोग से आयोजित 'नमामिदेविनर्मदे' यात्रा जनमानस को प्रेरित करती हुई अत्यन्त प्रशसनीया यात्रा रही।

नर्मदानदी भारतवर्ष के मध्य में तथा गुजरात प्रदेश में बहने वाली राष्ट्र की तीसरी महती नदी है। इसका उद्गम महाकालपर्वत के अमरकंटक से हुआ है। नर्मदा नदी के तट पर गुरुकृपाश्रम, भीमकोली शुक्रतीर्थ आदि अनेक पवित्र आश्रम है जहाँ दर्शनार्थियों का ताता लगा रहता है। अपनी अलौकिक महिमा के कारण नर्मदा मध्यप्रदेश की जीवन-रेखा के रूप में सम्मान्य है। स्कन्दपुराण के 'रेवाखण्ड' में भगवान वेदव्यास जी के द्वारा नर्मदा नदी की महिमा विस्तृतरूप से वर्णित की गई है। व्यासजी के वचनों से ज्ञात होता है कि नर्मदानदी पापनाशिनी, मोक्षदायिनी शान्ति विधायिनी दिव्य नदी है। कहा भी गया है नर्मदा नदी सुन्दर बूंदों, उत्ताल लहरों की सुन्दर गति से व्याप्त है, इसका जल अमृत के समान है, तथा यम के भय से भी मुक्त करने वाला है ऐसी नर्मदा नदी के चरण कमलों में मैं नमन करता हूँ। - नर्मदाष्टकम्

मत्स्यपुराण से ज्ञात होता है कि यमुनाजल सात दिनों में, सरस्वती नदी का जल तीन दिनों में गंगाजल एक दिन में तथा नर्मदा नदी का जल तत्क्षण ही मनुष्य को पवित्र कर देता है नर्मदानदी की उत्पत्ति के विषय में अनेक

कथाएँ प्रचलित हैं। कहा जाता है कि कदाचित् तप में तल्लीन भगवान शंकर के शरीर से गिरी हुई पसीने की बूँद से दिव्य सौन्दर्यमयी एक बालिका प्रकट हुई उसके सौन्दर्य से हर्षित शंकर पार्वती ने उसे 'नर्मदा' अर्थात 'सुखदा' नाम से विभूषित किया एक अन्य कथा के अनुसार कदाचित् मेखल पर्वत पर भगवान् शंकर ने द्वादश वर्ष की कन्या को प्रादुर्भूत किया इस कन्या ने काशीप्रदेश में पंचकोशी क्षेत्र में 10000 हजार वर्षो तक तपस्या की। कन्या की तपस्या से प्रसन्न शंकर से उस कन्या ने कुछ ऐसे वरदान प्राप्त किये जो अत्यन्त दुर्लभ एवं अनन्य थे, कन्या ने शिव से अमरत्व अपने प्रत्येक पाषाण खण्ड की बिना प्राण प्रतिष्ठा के ही शिवरूप में पूजा तथा अपने तट पर पार्वती सहित सभी देवों का निवास माँग कर दिव्य एवं अनन्य रूप प्राप्त किया। ऐसे दिव्यरूपा, गुण से सम्पन्न नर्मदा नदी को कालक्रम से विकृत अवस्था को देखकर मध्यप्रदेश के मुख्य मंत्री नर्मदा नदी के संरक्षण के लिए कटिबद्ध हो गए। इसके लिए मुख्यमंत्री द्वारा नमामि देवि नर्मदे नाम की भव्य यात्रा के माध्यम से जन जागरण किया गया। 11 दिसम्बर 2016 को अमरकंटक से प्रारम्भ हुई यह यात्रा 148 दिनों में 3300 किलोमीटर की दूरी पार कर 25 लाख सहयोगियों के साथ 15 मई 2017 को अपने गन्तव्य पर आ पहुँची नर्मदा नदी के संरक्षण के लिए मुख्यमंत्री शिवराज सिंह चौहान के द्वारा किया हुआ भगीरथ प्रयास स्तुत्य एवं अनुकरणीय है।

**-सी-276, भाभामार्ग, तिलकनगर, जयपुर**

# दत्तन्न राष्ट्राय किम्

**❑ डॉ. रामनारायण झा**
**महाकविः जयपुर**

**आकाशं पवनं धनञ्जयजले विश्वम्भरा शाश्वतं**
**प्राणी दैवतदेविके नरपशू पक्षीभुजंगौ नगः।।**
**लेह्यं चोष्यमिदं प्रभूतविषयं भोज्यञ्च भोग्यं जगत्,**
**अब्धिर्विष्णुरयं यमस्सुरपतिः दत्तन्न राष्ट्राय किम्।।15।।**

**उद्यानं विपिनं रसो रसनिधिर्गेहं सभा सम्मतिः**
**राजा धर्मरतः प्रजा प्रतिभटो सेना सुकृद् दुष्कृती।**
**कामो धर्मधिया नरोऽथ युवती रात्रिर्दिवा चाप्सरा**
**नृत्यं हास्यरती यतिः प्रणयकृद् दत्तन्न राष्ट्राय किम्।।16।।**

**वेदो निश्वसितं मतं सुविमलं सत्यं शिवं सुन्दरं**
**चत्वारश्श्रुतिगा वदन्ति सकला वेदार्थगाहाश्च ते।**
**आम्नायोऽभ्यसनाच्छ्रवाच्च विदिताद् वेदश्रुती नामतः**
**सक्लान्तं जयतेतरामिति मनो ब्रह्माण्डभाण्डोदधौ।।17।।**

**वाणी गीतमयी करौ कृतिचरौ दानध्वजौ सम्प्रति,**
**पादौ लोकहिताय वस्तुसकलं सम्यक् स्थितिः सन्निधौ।**
**सच्छास्त्राय गुरोः शिवत्वमनिशं संकल्पनानामथा**
**ह्रारे वा शुचिलोऽचलं नु विमलं चित्तं चमत्कारि शम्।।18।।**

**गेयं साम यजुश्च गद्यमथवा पद्ये ऋचां निर्मितिः,**
**सर्वज्ञानमयो य आदिपुरुषश्चाम्नायनाम्नैकधा**
**भिन्नःक्षीण वपुस्थितो लययुतो गायन्ति सर्वे अमी**
**भूमानं पुरुषं प्रियं प्रतिपलं गोलोकधाम्नि प्रिया।।19।।**

**वेदानामहमस्मि साम भगवान्गान्धर्वविद्यां प्रति**
**सम्प्रोवाच पुराधिगीतमनघं गेयं वचो यच्छुचि।**
**तद्धि प्राणमयं रसाब्धिरसितं लोकोत्तरानन्ददं**
**तस्मात्सर्वमिदं विवर्तिततमं तत्प्रेमभावान्वितम्।।20।।**

**आत्मा योऽद्य पुरा ततश्च भगवान् ब्रह्मेति चाख्या यतः,**
**यागो यज्ञपुमानयं ह्यणुमयश्शस्त्रास्त्रपूर्णस्ततः।**
**विद्या या ह्यपरा पराऽक्षरविधिश्छन्दोऽथ नीतिस्त्वियं**
**त्यागः कर्म तपो दया शमदमौ दत्तन्न राष्ट्राय किम्।।21।।**

390, रजनीविहार, हीरापुरा, अजमेर रोड़, जयपुर (राज.)

आयुर्वेद-स्तम्भः

# पेयं सुपेयं भीष्मे हि ग्रीष्मे

❏ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**यदा ग्रीष्मे तीक्ष्णांशुः स्वैस्तीक्ष्णांशुभिरितस्ततः प्रेक्षयन्नेकाकी पथिकवत् व्योम्नि विचरति तदा जगतः स्नेहः स्वत एव शनैः शनैः संक्षीयते। गृहेषु सुगुप्तः तथा वृक्षच्छायायां संश्रितोऽपि जनः तरुणतरणि-तेजःपुञ्जसन्तप्तदेहः फणीव स्वां जिह्वामोष्ठाभ्यां बहिर्निःसारयन् तिग्मतापोपशान्तयेऽतिशयं शीतलं जलं द्रवं वाऽभिकांक्षति। भृशमभितापितः सः द्रवेण सन्तृप्ततां यदाऽनुभवति तस्मिन्नेव क्षणे उद्दामद्युमणिः स्वैर्दीधितिभिः पुनस्तां द्रवतां संशोषयति। अतः भीष्मे हि ग्रीष्मे पुनः पुनः जलं द्रवं वाऽभिकांक्षति जनः। तस्मान्नरो देहे द्रवस्य स्नेहस्य च संरक्षणार्थं मुहुर्मुहुर्द्रवं जलं वा सन्तर्पणात्मकं पिबेद् भूरि। बहुविधानां सन्तर्पणात्मकानां पेयानां प्रचलनं वर्तते लोके। आयुर्वेदशास्त्रेषु वृद्धवैद्यव्यवहारेऽपि च पेयानामुल्लेखः प्रचलनञ्च वर्तते। तेषां प्रयोगः रवेर्मयूखैरभितापितं जनं सन्तर्पयति। अत्र केषाञ्चित् सुपेयानामुल्लेखः क्रियते-**

जब ग्रीष्म में सूर्य अपनी तीक्ष्ण किरणों से इधर-उधर देखता हुआ एकाकी पथिक की तरह आकाश में विचरण करता है तब संसार का स्नेह स्वतः ही शनैः-शनैः क्षीण होता है। घरों में अच्छी तरह छुपा हुआ और वृक्ष की छाया में आश्रय लिया हुआ व्यक्ति युवा (मध्याह्न के) सूर्य के तेज के समूह से सन्तप्त देह वाला व्यक्ति सर्प की तरह अपनी जिह्वा को ओष्ठों से बाहर निकालता हुआ प्रचण्ड ताप की शान्ति के लिए अत्यन्त शीतल जल या शीतल द्रव्य की आकांक्षा करता है। अत्यन्त तपाया गया वह जब द्रव से सन्तृप्तता का अनुभव करता है उसी क्षण निरंकुश सूर्य अपनी किरणों से उस द्रवता को संशोषित कर देता है। इसलिए भयङ्कर ग्रीष्म में व्यक्ति पुनः पुनः जल की या द्रव की इच्छा करता है। इसलिए व्यक्ति शरीर में द्रव का या स्नेह का संरक्षण करने के लिए बार-बार सन्तर्पणात्मक द्रव या जल को थोडी-थोडी मात्रा में पीवे। इस संसार में सन्तर्पण करने वाले अनेक पेय पदार्थों का प्रचलन है। आयुर्वेद-शास्त्रों में और वृद्धवैद्यव्यवहार में भी पेय पदार्थों का उल्लेख और प्रचलन है। उनका प्रयोग सूर्य की किरणों से तपाए गए (सन्तप्त) व्यक्ति को सन्तृप्त करता है। यहाँ कुछ श्रेष्ठ पेय पदार्थों का उल्लेख किया जा रहा है -

**आचार्यः वाग्भटः ग्रीष्मर्तुचर्यायां संक्षेपेण निर्दिशति यत्-**

**पिबेद्रसं नातिघनं रसालां रागषाडवौ।**
**पानकं पञ्चसारं वा नवमृद्भाजने स्थितम्।।**
**मोचचोचदलैर्युक्तं साम्लं मृन्मयशुक्तिभिः।**
**पाटलावासितं चाम्भः सकर्पूरं सुशीतलम्।।**

**(अ.हृ.सू.3/30-31)**

**संकेतात्मको ह्येषः निर्देशः।**

**अत्र यद्यपि रसं नातिघनमित्यनेन मांसरस एव निर्दिष्टः तथापि ये ह्यमांसभोजिनः सन्ति ते फल-रसमेव गृह्णीयुः। रसालादीनामन्येषां पेयानाञ्चात्र पृथक्रूपेणोल्लेखो भविष्यति। अत एवोपर्युक्तानां वाग्भटवाक्यानामत्र संकेतात्मकतैव स्वीकृता।**

**अम्भसः सुवासिततापि पाटलापुष्पेण निर्दिष्टा, साऽपि संकेतात्मिकैव। तेन हि येन केनापि सुवासितेन द्रव्येण सुवासितं जलं सुपेयं वा पेयम्।**

आचार्य वाग्भट ग्रीष्म ऋतुचर्या के वर्णन-क्रम में संक्षेप में निर्दिष्ट करते हैं कि -

पतला रस (मांसरस) को पीवे (या फलरस पीवे) तथा रसाला (शिखरिणी) एवं राग (खट्टी चटनी) तथा षाडव (औषधियों से निर्मित कुछ खट्टा पेय पदार्थ), पानक या पञ्चसार नामक पेय को जो कि नवीन मिट्टी के पात्र में रखा हुआ हो उसी पीवे। इन में केले और नारियल के टुकड़ों को मिलाकर खट्टा कर के मिट्टी की बनी सीप (चम्मचनुमा सीप) से खावे तथा पाटलापुष्प से सुवासित कर्पूरमिश्रित अतिशय शीतल जल को पीवे।

यह निर्देश संकेत स्वरूपक है। यहाँ पर यद्यपि 'रसं नातिघनम्' इस से मांस रस का ही निर्देश है फिर भी जो अमांसभोजी हैं वे फलरस ही ग्रहण करें। रसाला (शिखरिणी) इत्यादि अन्य पेय पदार्थों का यहाँ पृथक् रूप से उल्लेख होगा। इसलिए वाग्भट के उपर्युक्त वाक्यों की यहाँ संकेतात्मकता ही स्वीकृत है। पानी की सुवासितता भी पाटला के पुष्प से बताई गई है, वह भी संकेतात्मिका ही है। इसलिए जिस किसी भी सुगन्धयुक्त द्रव्य से सुगन्धित जल का श्रेष्ठ पेय को पीना चाहिए।

**पञ्चसारः मन्थः-**

**आचार्येण वाग्भटेन रक्तपित्ताख्ये रोगे पञ्चसारः मन्थः निर्दिष्टः, यथा-**

**मधुखर्जूरमृद्वीकापरूषकसिताम्भसा।**
**मन्थो वा पञ्चसारेण सघृतैर्लाजासक्तुभिः।।**

**(अ.हृ.चि. 2/14)**

**एषः हि मन्थः रक्तपित्तनिवारकः बलप्रदः सन्तर्पणात्मकश्च वर्तते। सन्तर्पणात्मकाः सर्वे मन्थाः तर्पणाश्च ग्रीष्मर्तौ सेवनीयाः वर्तन्ते। एभिः तृप्तिर्भवति दाहनिवारणञ्चापि जायते। सुश्रुताचार्येण त्वन्यत् पञ्चसारं, पेयं, ज्वरे निगदितम्, तत्र पिप्पलयः सन्ति, तस्य प्रयोगः ग्रीष्मे न करणीयः।**

**रसाला -**

**सचतुर्जातकाजाजि ससितार्द्रकनागरम्।**
**रसाला स्याच्छिखरिणी संघृष्टं ससरं दधि।।**
**एषा रसाला बृंहणी, वृष्या भवति।**

**पञ्चसार मन्थ-**

आचार्य वाग्भट ने रक्तपित्तनामक रोग में पञ्चसार नामक मन्थ कहा है, जैसे-

शहद, खर्जुर (या पिण्डखर्जुर), मुनक्का, फालसा एवं मिश्री मिले पानी से इस पञ्चसार से घृत और लाजा के सत्तू से बनाए गए मन्थ को पीना चाहिए।

यह मन्थ रक्तपित्त (नकसीर आदि) को दूर करने वाला, बलप्रद और सन्तर्पण स्वरूप का होता है। सन्तर्पण स्वरूप वाले सभी मन्थ और तर्पण ग्रीष्मऋतु में सेवनीय है। इनसे तृप्ति होती है और दाह का निवारण भी होता है। सुश्रुताचार्य ने तो ज्वर में अन्य पञ्चसार पेय कहा है, उसमें पिप्पली है, उसका प्रयोग ग्रीष्म में नहीं करना चाहिए।

**रसाला-**

दालचीनी, इलायची, तेजपत्र, केसर (यह चतुर्जात है) इस के साथ काला जीरा मिश्री, अदरक, सोंठ यथामात्र डाल कर मलाईसहित घिसकर छाने गए दही को रसाला कहते हैं। इसे शिखरिणी (शिखरन, श्रीखण्ड) भी कहा जाता है। यह रसाला बृंहण करने वाली और वृष्य होती है।

**तर्पणास्तर्पणाः-**

**तर्पणाः द्विविधात्मकाः भवन्ति। एके स्वरूपेण तर्पणाः भवन्ति, वस्तुतस्तु ते संज्ञामात्रेण तर्पणाः भवन्ति तत्र हि व्योष-विडङ्ग-शिग्रु-त्रिफलेत्यादीनि द्रव्याणि सन्ति तानि हि सर्वाण्यपतर्पणकारकाणि भवन्ति। तेषां प्रयोगः ग्रीष्मे न करणीयः। किन्त्वन्ये ये सन्तर्पणात्मकाः तर्पणाः सन्ति तेषां प्रयोगस्तु ग्रीष्मे करणीयः। अत्र केषाञ्चित् सन्तर्पणात्मकानां तर्पणानामुल्लेखः क्रियते-**

**खर्जुरादिमन्थः-**

**खर्जूरमृद्वीकावृक्षाम्लाम्लीकदाडिमैः परूषकैः सामलकैर्युक्तो मन्थः ग्रीष्मे सन्तर्पणकारको भवति।**

**सकाञ्जिकं तर्पणम्-**

**सक्तवः क्षौद्रं शर्करा चेति त्रितयं यथामात्रं काञ्जिके सम्मिश्र्य पिबेत्। इदं तर्पणं मारुतविण्मूत्रकफपित्तानुलोमनं भवति। ये ह्यम्लपित्तेन त्रस्ताः सन्ति तैरिदं न सेव्यम्। अधिकं काञ्जिकमिश्रणं न कर्तव्यम्, अत्र हि किञ्चिज्जलमिश्रणमपि कर्तव्यम्।**

**तर्पण करने वाले तर्पण -**

तर्पण दो प्रकार के होते हैं। एक केवल स्वरूप से ही तर्पण होते हैं। वस्तुतः वे संज्ञामात्र से ही तर्पण होते हैं, उनमें त्रिकटु (सौंठ, मरिच, पिप्पली), विडङ्ग, सहिंजना, त्रिफला इत्यादि द्रव्य होते हैं, वे सभी द्रव्य अपतर्पण करने वाले होते हैं। उनका प्रयोग ग्रीष्म में नहीं करना चाहिए। किन्तु अन्य जो सन्तर्पण करने वाले तर्पण होते हैं उनका प्रयोग तो ग्रीष्म में करना चाहिए। यहाँ कुछ सन्तर्पण करने वाले तर्पणों का उल्लेख किया जा रहा है-

**खर्जूरादि मन्थ -**

खर्जूर (या पिण्डखर्जूर), मुनक्का, वृक्षाम्ल (विषांविल, कोकम), इमली, अनारदाना और फालसा तथा आँवला (इन्हें थोड़ी-थोड़ी मात्रा में डालकर) इन से बनाया गया मन्थ (पानी, मिश्री और लाजासत्तु या जौ का सत्तू मिलाकर बनाया गया मन्थ) ग्रीष्म में सन्तर्पण करने वाला होता है।

**काञ्जिकयुक्त तर्पण -**

सत्तू (जौ का या लाजा का, शहद और शर्करा इन तीनों को मात्रानुसार काञ्जी में मिलाकर पीवे। यह तर्पण अपान वायु, मल, मूत्र, कफ और पित्त का अनुलोमन करने वाला होता है। जो लोग अम्लपित्त रोग से पीडित होते है, उन्हें इसका सेवन नहीं करना चाहिए। इसमें कुछ जल का भी मिश्रण करना चाहिए।

**खर्जूरादिहिमः-**

**पिण्डखर्जूरमृद्वीकामधूकैः सपरूषकैः कृतः हिमः प्रयोक्तव्यः। एषु चतुर्षु प्रत्येकं द्रव्यं दशग्राममात्रं ग्रहीतव्यम्। रात्रौ द्रव्याण्येतानि संक्षोद्य 300 मि.लि. परिमिते जले प्रक्षिप्य संरक्षेत्। प्रातःकाले हस्ताभ्यां सम्यग् विमर्द्य वस्त्रेण पूतं जलमेतत् पातव्यम्। सन्तर्पणकारकः दाहनिवारकः शीतवीर्यात्मको ह्येषः हिमः। अत्र मधूकानां पुष्पाणां फलानां वा ग्रहणं कर्तव्यमथवा पञ्चग्रामात्मकानि फलानि तावन्त्येव पुष्पाणि च गृहीत्वा हिमः कर्तव्यः।**

**मधुकादिहिमः -**

**आयुर्वेदीयद्रव्याणां यूनानीद्रव्याणाञ्च शीतवीर्यात्मकानां सम्मिश्रणेन कृतो हिमः दाहनिवारकोंशुघातनिवारकश्च भवति। एष हिमोऽर्द्धावभेदके,**

**शिरःशूले, मन्दज्वरे, प्रतिश्याये चोपयोगी भवति। कफघ्नो ह्येषः श्वासे कासे चापि हितकारको भवति। विधिश्चास्यातीव सरलो वर्तते। मधुयष्टी-बीहीदाना-गावजके-गुलवनफ्शा-रेशाखतमी-द्राक्षाश्लेष्मात-कानाञ्चैतेषां सप्तसंख्यात्मकानां द्रव्याणां पृथक्-पृथक् रूपेण पञ्चदशग्रामपरिमितायां मात्रायां ग्रहणं कृत्वा संक्षोद्य सप्तपुटिकाः विधातव्याः। एकां पुटिकां गृहीत्वा रात्रौ 300 मि.लि. परिमिते जले सम्यक् संनीय पिधातव्यम्। प्रातःकाले हस्ताभ्यां विमर्द्य वस्त्रेण पूतमेतज्जलं पातव्यम्। एवं प्रतिदिनमेकमासपर्यन्तं करणीयम्। सायं प्रातः द्वयोरपि कालयोरस्य प्रयोगः करणीयः वर्तते। सायंकाले सेवनीयः हिमः प्रातःकाले जले प्रक्षिप्तैः द्रव्यैः निर्मितः भवेत्। प्रातः काले सेवनीयः तु रात्रौ जले प्लुतैः द्रव्यैः निर्मितः भवेत्। अत्र सितामिश्रण-मत्यावश्यकं वर्तते।**

**खर्जूरादि हिम –**

पिण्डखर्जूर, मुनक्का, महुआ और फालसे के फलों से बनाया गया हिम प्रयुक्त करना चाहिए। इन चारों में प्रत्येक द्रव्य को दश ग्राम की मात्रा में लेना चाहिए। रात्रि में इन द्रव्यों को कूटकर 300 मि.लि. जल में डालकर रख देना चाहिए। प्रात:काल दोनों हाथो से मसलकर कपड़े से छान कर यह जल पीना चाहिए। यह हिम सन्तर्पण करने वाला और दाह को दूर करनेवाला तथा शीतवीर्य होता है। इसमें महुए के फूलों का अथवा फलों का ग्रहण करना चाहिए, अथवा पाँच ग्राम फल तथा इतने ही फूल लेकर हिम करना चाहिए।

**मधुकादि हिम –**

शीतवीर्य आयुर्वेदीय द्रव्यों के तथा यूनानी द्रव्यों के सम्मिश्रण से बनाया गया हिम अंशुघात(लू लगना) का निवारण और दाह का निवारण करने वाला होता है। यह हिम अर्द्धावभेदक (आधाशीशी रोग), शिर:शूल, मन्दज्वर और प्रतिश्याय (जुकाम) में उपयोगी होता है। कफ को नष्ट करने वाला यह हिम श्वास और कास में भी हितकारक होता है। इसकी विधि अत्यन्त ही सरल है। मुलहठी, बीहीदाना, गावजवाँ, गुलबनफ्शा, रेशाखतमी, मुनक्का और लिसोडा इन सात संख्या वाले द्रव्यों को पृथक्-पृथक् रूप से 15-15 ग्राम की मात्रा में लेकर कूट कर सात पुड़ियायें बना लेनी चाहिए। एक पुड़िया को लेकर रात में 300 मि.लि. जल में अच्छी तरह एकत्र कर (भिगोकर) ढक देना चाहिए। प्रात:काल हाथों में मसल कर कपड़े से छान कर इस जल को पीना चाहिए। इस तरह प्रतिदिन एक माह तक करना चाहिए। सायंकाल और प्रात:काल दोनों समय में इसका प्रयोग करना चाहिए। सायंकाल में सेवनीय हिम प्रात:काल जल में डाले गए द्रव्यों से निर्मित होना चाहिए। इस हिम में मिश्री का मिश्रण अत्यावश्यक है।

**धान्यकादिहिमः-**

**भावप्रकाशे भैषज्यरत्नावल्याश्च रक्तपित्ताधिकारे धान्यकादिहिमः प्रोक्तः यस्य प्रयोगः ग्रीष्मेऽतीव हिततमः वर्तते। आचार्यः निर्दिशति यत्-**

**धान्याकधात्रीवासानां द्राक्षापर्पटयोर्हिमः।**
**रक्तपित्तं ज्वरं दाहं तृष्णां शोषञ्च नाशयेत्।**

**एतेषां द्रव्याणां ग्रहणं पृथक्-पृथक् रूपेण पञ्चग्रामपरिमितमेव कर्तव्यम्। हिमविधिना निर्मिते**

**पेये 25 ग्राम परिमितस्य मधुनोऽथवा, 10 ग्राम सितायाः सम्मिश्रणं कर्तव्यम्। स्वादे किञ्चित्तिक्तोऽप्येषः श्रेष्ठः फलप्रदो वर्तते।**

**काश्मर्यादिशीतकषायः-**

**चक्रदत्ते दाहनिवारकः तृष्णानिवारकः एषः शीतकषायः (हिमः) सद्यः फलप्रदो वर्तते। यथा-**

**काश्मर्यशर्करायुक्तं चन्दनोशीरपद्मकम्।**
**द्राक्षामधुकसंयुक्तं, पित्ततर्षे जलं पिबेत्।।**

**एवमेव बहुविधानां हितकारकाणां पेयानां शास्त्रेषूल्लेखः व्यवहारे च प्रचलनं वर्तते। वर्तमानकाले हानिकराणां रासायनिकद्रव्यैर्विनिर्मितानां पेयानां प्रचलनं वर्तते। तानि पेयानि विहाय हितकराणां पारम्परिकपेयानां प्रयोगः करणीयः। नारिकेलोदकं तु प्रकृतितः प्रदत्तं श्रेष्ठ पेयं वर्तते। तत्तु ग्रीष्मे विशेषेण पिबेत्। यद्यपि तत्तु किञ्चिद् गुरु भवति तथापि पित्तघ्नं पिपासाह्नश्चैतत् शीतवीर्यात्मकं भवति-**

**स्निग्धं स्वादु हिमं हृद्यं दीपनं बस्तिशोधनम्।**
**वृष्यं पित्तपिपासाघ्नं नालिकेरोदकं गुरु।**

**(सु.सू. 45/43)**

**धान्यकादि हिम-**

**भावप्रकाश में एवं भैषज्य रत्नावली के रक्तपित्त रोगाधिकार में धान्यकादि हिम कहा गया है जिसका प्रयोग ग्रीष्म में अत्यन्त हितकर होता है। आचार्य कहते हैं कि-**

**धनिया, आँवला, अडूसे के फूल, मुनक्का और पित्त- पापडा से बनाया गया हिम रक्तपित्त, ज्वर, दाह, तृष्णा और शोष को नष्ट करता है।**

**इन द्रव्यों को पृथक्-पृथक् रूप से पाँच-पाँच ग्राम की मात्रा में लेना चाहिए। हिमविधि से निर्मित पेय में 25 ग्राम मधु का या 10 ग्राम मिश्री का मिश्रण करना चाहिए। स्वाद में कुछ कडवा होते हुए भी यह हिम श्रेष्ठ फलप्रद होता है।**

**काश्मर्यादि शीतकषाय-**

चक्रदत्त में दाह को दूर करने वाला और तृष्णा (प्यास) को दूर करने वाला यह शीतकषाय (हिम) तत्काल फल देने वाला होता है।

गम्भारी, चन्दन, खस, पद्मकाष्ठ, मुनक्का, मुलहठी इन सब को कूट कर रात को भिगोकर सुबह मसलकर छान कर मिश्री मिला कर पित्तज तृष्णा में यह जल पीना चाहिए।

इसी तरह अनेक प्रकार के हितकारक पेय पदार्थों का शास्त्रों में उल्लेख और व्यवहार में प्रचलन है। वर्तमान काल में हानि करने वाला रासायनिक द्रव्यों से निर्मित पेयपदार्थों का प्रचलन है। उन पेयों को छोड़कर हितकारी पारम्परिक पेय पदार्थों का प्रयोग करना चाहिए। नारियल का पानी तो प्रकृति-प्रदत्त-श्रेष्ठ पेय है, उसे ग्रीष्म में विशेष रूप से पीना चाहिए। यद्यपि वह कुछ गुरु होता है, फिर भी पित्त को नष्ट करने वाला और पिपासा को शान्त करने वाला यह शीत वीर्यवाला होता है-

स्निग्ध, मधुर, शीत, हृदय के लिए हितकर (रुचिकर), अग्नि और दीप्त करने वाला, बस्ति का शोधन करने वाला, वृष्य और पित्तजन्य तृष्णा को नष्ट करने वाला गुण में गुरु यह नालिकेरोदक होता है

**80, सेनापति हाउस के पीछे, प्रेमनगरम्,**
**झोटवाड़ा, जयपुरम्**

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

# ए इन्फ्रास्ट्रक्चर लिमिटेड

निर्माता

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online
through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**
विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**
**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,